संस्कृत-साहित्य-वल्लरी

सम्पादकः—
आचार्य सुदर्शनदेव शास्त्री,
प्रधान संस्कृताध्यापक,
जोधपुर।

जोधपुर
दी स्टूडेण्ट्स बुक कम्पनी,
प्रकाशक तथा पुस्तक विक्रेता।
करण] १९५९

मङ्गलश्लोकाः

इस पुस्तक के निम्नलिखित मङ्गल श्लोक संस्कृत के कई धार्मिक ग्रन्थों से लिखे गये हैं।

यस्माद् विश्वमुदेति यत्र रमते यस्मिन् पुनर्लीयते
भासा यस्य जगद् विभाति सहजानन्दोज्ज्वलं यन्महः।
शान्तं शाश्वतमक्रियं यमपुनर्भावाय भूतेश्वरं
द्वैतध्वान्तमपास्य यान्ति कृतिनः प्रस्तौमि तं पूरुषम् ॥१॥

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्त्तेति नैयायिकाः।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वांछितफलं त्रैलोक्यनाथो हरिः ॥२॥

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्
त्वमव्ययः शाश्वतधर्मगोप्ता पुरातनस्त्वं पुरुषो मतो मे ॥३॥

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्त्ते
धुर्यां लक्ष्मीमथ मयि भृशं धेहि देव प्रसीद।
यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन् भूयसे मंगलाय ॥४॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
तन्निमित्तो वरं त्यागो विनाशे नियते सति ॥ २ ॥
रविश्चन्द्रो घना वृक्षा नदी गावश्च सज्जनाः ।
एते परोपकाराय सदा दैवेन निर्मिताः ॥ ३ ॥
तृणं चाहं वरं मन्ये नरादनुपकारिणः ।
घासो भूत्वा पशून् पाति भीरून् पाति रणांगणे ॥ ४ ॥
आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
परं परोपकारार्थं यो जीवति स जीवति ॥ ५ ॥
परोपकारशून्यस्य धिक् मनुष्यस्य जीवितम् ।
जीवन्तु पशवो येषां चर्माप्युपकरिष्यति ॥ ६ ॥
रागिणि नलिने लक्ष्मीं दिवसो विदधाति दिनकरप्रभवाम् ।
अनपेक्षितगुणदोषः परोपकारः सतां व्यसनम् ॥ ७ ॥
परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ॥ ८ ॥
भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिः भूरिविलम्बिनो घनाः
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ ९ ॥
श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिः न तु कंकणेन ।
विभाति कायः खलु सज्जनानां परोपकारेण न चन्दनेन ॥१० ॥
पद्माकरं दिनकरो विकचं करोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः॥११॥

प्रश्नाः

१—परोपकार शीर्षकम् अवलम्ब्य पञ्चदशपंक्तयः लेख्या देववाण्याम् ।

स्वामी शंकराचार्यो मातुः परमभक्त आसीत। तद्विषये जनश्रुतिरेका। तज्जननी प्रत्यहं तटिनीं स्नातुं गच्छन्ती आसीत्। एकदा नदीमवगाह्य गृहं निवर्त्तमानासौ पथि मूर्च्छिता पतिता च। अनागतवतीं मातरं विलोक्यानिर्दिष्टशंकया उद्विग्नमना आचार्यस्तामन्वेषमाणस्तत्रैव गतो यत्र विसंज्ञा सा धरायां पतितासीत्। तत्क्षणमेव साश्रुनयनोऽसौ दुर्दशाग्रस्तां तामुदस्थापयत्। ततः वार्द्धक्यैकाधारं सूनुमुखचन्द्रं विलोकयन्ती माता चैतन्यं लेभे। आचार्येण कथितं यद्येषा कल्लोलिनी मद्गेहपार्श्वे प्रवहेत् तदा जननी गमागमप्रयासं नानुभवेदिति। श्रूयते यदल्पकाले एव सा निम्नगा तत्सद्मनः पार्श्वे प्रावहत्।

अथैकदा श्री शंकरो मात्रा सगं कस्यचिद् स्वसंबंधिनो गृहं प्रस्थितः। पथि अल्पतोयां नदीमनायासेनैव पारं गतः किन्तु प्रत्यागमनकाले जलपूर्णां घर्घरनादां प्रवहन्तीं तां पुष्करिणीं वीक्ष्याकण्ठजलं प्रविश्य स मातरमुवाच। मातः, बलवता ग्राहेण मे पादो धृतोऽहमेकं पदमपि गन्तुं न शेके। अपूर्णसंन्यासमनोरथोऽहं पंचत्वं गमिष्यामि तेन मे आत्मा परलोके शान्तिं न प्राप्स्यते। ततः पथिमध्ये एकाकिनी विपदाशंकया भीता तदवस्थं स्व पुत्रमेवमन्यतत्प्रतीकारमपश्यन्ती स्नेहवशगा जननी सद्य एव तं संन्यासग्रहणार्थमनुमेने।

ततः शंकराचार्यः गृहं परित्यज्य दुर्गमपर्वतेषु सघनविपिनेषु च महत्तपोऽतपत्। एकदा नर्मदा तटे भ्रमन्नसौ रहसि वसतो गोविन्दयोगिन उपागच्छत्। तं विलोक्य योगिराजैस्तत्क्षणमेव विभावितं यदसौ युवा प्रतिभाशाली वर्त्तते। श्रीमद्गोविन्दपादास्तं ब्रह्मज्ञानमशिक्षन्त। ततः गुरूणामनुज्ञया अद्वैतसिद्धान्तप्रचारार्थं आर्यावर्त्ते भ्रमन्नसौ काशीमभ्यु-

[illegible]ः। तत्र परि[illegible] ये विद्वांसस्तस्या[illegible]पदेश-
[illegible] ते [illegible]बोधन्।

[illegible] परमविदुषा [illegible]नायकेन सभापण्डितेन [illegible] सार्धं तस्य वादोऽभवत्। तस्मिन् विदुषां [illegible] [illegible] [illegible] जाया उभयभारती [illegible]। सा तयोः [illegible] [illegible] दत्वा [illegible] [illegible]। तत्र [illegible] विजयते स्म। ततः [illegible] दिग्विजयं [illegible] शारदामठं [illegible] जगन्नाथपुर्यां गोवर्धनमठं दक्षिणापथे [illegible] च [illegible]न्।

षष्ठः पाठः

बाल्यसंस्कारोऽमार्ज्यः

दाक्षिणात्य श्री पाद शास्त्री, न्याय, वेद, मीमांसा तीर्थ संस्कृत भाषा के प्रकाण्ड पंडित और उच्च कोटि के लेखक हैं। आपने वि० सं० १९९४ में "शिवाजिचरितम्" नामक ग्रन्थ लिखा, इसकी भाषा सुबोध एवं शैली रोचक है। विद्वान् लेखक ने अन्य ग्रन्थ भी लिखे हैं। प्रस्तुत पाठ उक्त ग्रन्थ से लिया गया है।

शहाजिराजाश्च पुत्रस्य सुलक्षणानि कर्माणि वीक्ष्य निभृतं मुदिता अपि तादृशं यवनद्वेषं सर्वानर्थकरं मन्वाना साध्व्या जिजादेव्या मुखेन तं यवनाधिपसेवां विधातुं प्राबोधयन्। साध्वी सा माता जिजादेवी यदा तं प्राणप्रियं पुत्रं प्रेम्णा तथोपादिशत तदा शिवराजोऽपि विनयेन प्रत्युत्तरयामास। मातः! त्वदुक्तं सर्वमेव सत्यम्। बलवन्तः सामर्थ्यशालिनः सार्वभौमा यवनाधिपा इत्यत्र न मे संशयः। बलवता समं दुर्बलेन द्वेषविधानं न नीतिः, नापि श्रेयस्करमित्यप्यहं जाने। तथापि दुर्बलान विप्रान्, असहायाः स्त्रीः वा गाः पीडयन्तो यवनानवेक्ष्याहमात्मानमपि विस्मृत्याविचार्यैव तद्धननार्थं चेष्टे। अम्ब! दीनत्राणं नाम क्षत्रियाणां नः परमं कर्म, तद्यदि अस्माभि र्नानुष्ठीयते केवलमौदासीन्यमवलम्ब्यास्थीयते तदा दुर्बलानां जगति जीवनमेवासंभावि। किं च मातः! अनेन दीनपालनकर्मणा कुपिता मदोन्मत्ता यवनाधिपा अस्मदीयं ग्रामादिकमपहरिष्यन्तीति तातपादा मां भूयो भूयो वदन्ति, परन्तु अहं वदामि

यदि [illegible] स तेन [illegible] संयुक्तो [illegible] । यो हि न्यायेन सर्वान् [illegible] पीडयन् । [illegible] न्यायेन [illegible] । तेनैव [illegible] । [illegible] । यथा [illegible] पूर्वं [illegible] इमां [illegible] ईशाः [illegible] तथा [illegible] पुनरपि तान् [illegible] । [illegible] न्यायेन [illegible] सर्वं [illegible] ।

पन्ति तथैवेदृशा मानवाधमा पापकर्मभ्यः । तस्माद् दीनपालनं क्षत्रियाणां कर्म न हास्यामि । तदर्थं सर्वं जीवनं यापयिष्यामि । यदि तु मदीयानेन कर्मणा पितृचरणेभ्यो वा तुभ्यं स्वल्पमपि दुःखं भवेत् तदाहमितो दूरे स्थापनीयः । तत्रैव स्थित्वा यथाशक्ति बलोन्मत्तानामेतेषां प्रतिकारं करिष्यामि । यद्वा तद्वा भवतु । अत्र निवसता मया खलु गोहत्यादिकं द्रष्टुमशक्यम् । दृष्ट्वा च मनसो नियमनं तु सुदुष्करम् । तन्मातः ! त्वमेवेदं सर्वम् पितृचरणेभ्यो निवेद्य दूरे मां प्रेषयेति ।

एतेन निसर्गत एव शिवराजस्य स्वातन्त्र्यप्रीतिः कथमासीदिति स्पष्टं भवति । बाल्ये यादृशान् संस्कारान् बालो बिभर्ति तादृशसंस्कारशाल्येव सोऽग्रे भवतीति बहुशो दृष्टम् । अतएव बलाढ्यान् यवनाधिपानगणयित्वा शिवराजः स्वराज्यं स्थापयितुं प्राभवत् ।

प्रश्नाः

१—"स्वातन्त्र्यजीवनं सर्वसुखभाजनं भवति" इति विषयं स्वीकृत्य द्वादश वाक्यानि लिखत ।

२—श्री शिवराजमहोदयस्य चित्तं किमर्थं दूयते स्म ?

३—निम्नलिखितक्रियापदानां रूपाणि लेख्यानि—प्राबोधयत्, जाने, दद्यात्, जनयति, यापयिष्यामि ।

४—अधोलिखितपदानामर्थो लेख्यः—न्यायेन वर्त्तनीयम्, क्षत्रियकुलसंभूताः, कदन्न भोजनम्, मनसो नियमनम्, तादृशसंस्कारशाली ।

(श्री शिवाजिचरितात्)

सप्तमः पाठः

मूल्यज्ञानम्

तीर्थे च तत्र पथि सौरगृहेऽखिलेऽपि
त्यक्ते प्रजाभिरवनीपतिशासनेन ।
मौनं व्यराजत महत् तटनी तटान्ते-
ष्वर्थेषु केवलमहो विगहाश्चुकूजुः ॥२॥
स्थित्वातिशीतलजले महिषी चिराय
प्राप्याथ कूलमनुगा रमणीरवादीत् ।
प्रज्वालयानलमरं ननु वेपमाना—
न्यङ्गानि मे न खलु शीतभरं सहन्ते ॥३॥
ता इन्धनार्थमुपगम्य वनं तरूणां
शाखालताभिररसा मुहुरप्यकर्पन् ।
तासां विलासमवलोक्य सकौतुकं तम्
आहूय राजमहिषी पुनरादिदेश ॥४॥
मूढाः समेत यदिदं च कुटीरमारा—
दत्रैव योजयत वन्हिमलं प्रयस्य ।
तेनैव शीतमपयास्यति नोऽखिलानां
घोरं जहास महिषीदमुदीरयन्ती ॥५॥
तां मालती सकरुणेदमुवाच दासी
मातः क एष परिहासनवावतारः ।
दीनस्य वा प्रवसतोऽथ तपस्विनो वा
पर्णोटजे किमिति दारुणशासनासि ॥६॥
श्रुत्वेति राजदयिता निजगाद रोषात्
दूरी कुरुध्वमतिदीनदयालुमेनाम् ।
नार्यस्ततो गतविवेकधियः प्रमत्ताः
तत्रानलं लघुगृहे निदधुर्हसन्त्यः ॥७॥
स्फीतं वपुः पवनकुण्डलितं दधानो
धूम्रा दिशः सपदि धूमचयश्चकार ।

अन्तः पुरे महति यावदिहासि राज्ञी
मूल्यं कियद् भवति जीर्णकुटीरकाणाम् ।
ज्ञातुं त्वयेति मनसापि न शक्यमेतत्
जाने, कठोरहृदये तदिदं निबोध ॥१५॥

आदेशतो नृपवरस्य च किंकरीभिः
वासो विभूषणचयेषु तदा हृतेषु ।
तां सद्य एव कृतभिक्षुसमानवेषा—
मानीय लोकपदवीं स पुनर्बभाषे ॥१६॥

अद्य प्रभृत्यनुदिनं भुवनेष्वटन्ती
भिक्षार्जितेन वसुना ननु कारयस्व ।
तावन्ति पर्णशरणानि कुतूहलिन्या
भस्मीकृतानि खलु यानि मुहूर्त्तमध्ये ॥१७॥

संवत्सरस्तव कृतः समयस्तदन्तः
सम्पाद्य कर्म विधिवद् भवने निवृत्य ।
त्वं ज्ञापयिष्यसि पुरः सकलप्रजानां
कीदृक् क्षतिर्भवति जीर्णकुटीरनाशात् ॥१८॥

प्रश्नाः

१—प्रजाभियोगमाकर्ण्य नृपो राज्ञीं किमवोचत् ?

२—अधोलिखितानां समस्तपदानां विग्रहः कार्यः; अर्थश्च लेख्यः—पुण्य-सलिलां, चारुतीर्थाम्, गतविवेकधियः, अरविन्दहस्ता, आस्थान-मण्डपगतम्, कृतभिक्षुसमानवेषाम् ।

३—द्वितीयसप्तमैकादशचतुर्दशषोडशश्लोकानां व्याख्या कार्या ।

(गीताञ्जलेः)

ततो राजा शंकरकवये द्वादश लक्षं ददौ। सर्वे विद्वांसश्च विच्छायवदना बभूवुः परं कोऽपि राजभयान्नावदत्। राजा च कार्यवशात् गृहं गतस्ततो विभूपालां सभां दृष्ट्वा विबुधगणस्तं निनिन्द अहो नृपतेरज्ञता किमस्य सेवया। वेदशास्त्र-विचक्षणेभ्यः स्वाश्रयकविभ्यः लक्षमदात्। किमनेन वितुष्टेनापि। असौ च केवलं ग्राम्यः कविः शङ्करः। किमस्य प्रागल्भ्यमित्येवं कोलाहलरवे जाते कश्चिदभ्यगात् कनकमणिकुण्डलशाली, दिव्यांशुकप्रावरणो नृपकुमार इव मृगमदपङ्ककलङ्कितगात्रो नवकुसुमसमभ्यर्चितशिराः, चन्दनाँगरागेण विलोभयन् विलास इव मूर्तिमान् कवितेव तनुमाश्रितः प्राप्तो विद्वान् तं दृष्ट्वा सा विद्वत्परिषद् भयकौतुकयोः पात्रमासीत्।

स च सर्वान् प्रणिपत्य प्राह। कुत्र भोजनृप इति। ते तमूचुरिदानीमेव सौधान्तर्गत इति। ततोऽसौ प्रत्येकं तेभ्यः ताम्बूलं दत्वा गजेन्द्रकुलगतो मृगेन्द्र इवासीत। ततः स महापुरुषः शङ्करकविप्रदानेन कुपितान् तान् बुद्ध्वा प्राह। भवद्भिः शंकरकवये द्वादशलक्षाणि प्रदत्तानीति न मन्तव्यम्। अभिप्रायस्तु राज्ञो नैव बुद्धः। शंकरस्य पूजने प्रारब्धे शंकरकविस्तु एकेनैव लक्षेण पूजितः। किन्तु तन्निष्ठान् तन्नाम्ना विभ्राजितान् एकादशरुद्रान् शंकरान् अपरान् मूर्त्तान् प्रत्यक्षान् ज्ञात्वा तेषां प्रत्येकम् एकैकं लक्षं तस्मै शंकरकवये एव शंकरमूर्त्तये प्रदत्तमिति राज्ञोऽभिप्राय इति। सर्वेऽपि चमत्कृतास्तेन।

ततः कोऽपि राजपुरुषः तद्विद्वत्स्वरूपं द्राक् राज्ञे निवेदयामास। राजा च स्वमभिप्रायं साक्षात् विदिवन्तं तं महेशमिव महापुरुषं मन्यमानः सभामभ्यगात्। स च स्वस्तीत्याह राजानम्। राजा च तमालिंग्य प्रणम्य निजकरकमलेन तत्करकमलमवलम्ब्य सौधान्तरं गत्वा प्रोत्तुंगगवाक्षे उपविष्टःप्राह।

विप्र! भवन्नाम्ना काव्यक्षराणि सौभाग्यावलंबितानि। कस्य वा देशस्य भवद्विरहः सुजनानां बाधते इति। ततः कविः लिखति राज्ञो हस्ते कालिदास इति। राजा वाचयित्वा पादयोः पतति। ततः तत्रासीनयोः कालिदासभोजराजयोरासीत् सन्ध्या। राजा सन्ध्ये सन्ध्यां वर्णयेत्यवादीत्। कालिदासः सन्ध्यां वर्णयति।

व्यसनिन इव विद्या क्षीयते पङ्कजश्रीः,
गुणिन इव विदेशे दैन्यमायान्ति भृंगाः।
कुनृपतिरिव लोके पीडयत्यंधकारो,
धनमिव कृपणस्य व्यर्थतामेति चक्षुः॥१॥

ततः क्रमेण भोजकालिदासयोः प्रीतिरजायत।

प्रश्नाः

नवमः पाठः

नृपसन्तापः

किसी समय राजा दशरथ मृगयार्थ सरयू नदी के किनारे जाते हैं। वहाँ से शब्दभेदी वाण छोड़ते हैं। उससे श्रवणकुमार की मृत्यु हो जाती है। अन्त में श्रवण के मा-बाप राजा दशरथ को शाप देकर स्वर्ग सिधारते हैं। मृत्युशैय्या पर पड़े हुए राजा रानी कौशल्या को अतीतकाल की समस्त गाथा सुनाते हैं। यह पाठ सम्पादक ने लिखा है।

सीतया लक्ष्मणेन चानुगतो-भगवान् रामचन्द्रो वनं गतः। कैकेयीं मन्थरां च विना सर्वेऽयोध्यावासिनो जनाः शोकाकुलाः संजाताः। कौशल्ययाभूतपूर्वं दुःखमन्वभूयत। पुत्र वियोगेन व्याकुलो राजा दशरथो बहु व्यलपत्। युवावस्थायामचरितं दुरितं स्मृत्वा तेन धर्मज्ञेनानुमित यदिदं महद् कष्टं प्राचीनदुष्कृतस्यैव विपाकोऽस्ति।

म्रियमाणोऽसौ कौशल्यां भूतपूर्वां कथामश्रावयत्। स करुणं प्राह-देवि! स्वकृतानां शुभाशुभकर्मणां फलं प्राप्यते जनैः। एकदाहं तारुण्ये धनुर्वाणानादाय सरयूनदीतटस्थितकाननेषु मृगयां कुर्वन्नितस्ततोऽव्रजम्। तत्तीरे नीरपानार्थमागतमृगान् न्यसूदयम्। तमिस्त्रायां निशि पादपतले प्रच्छन्नोऽहं जलेन प्रपूर्यमाणस्य कुम्भस्येव पानीयं पिबतो द्विरदस्य "बुड बुड" इति शब्दमश्रृणवम्। सूचीभेद्ये तमसि कश्चिद् वन्यो हस्ती अम्बु पातुमागत इत्यनुमीय सपदि शब्दं लक्ष्यीकृत्य वाणमक्षिपम्। तेन विद्धस्य जले पततः कस्यचिद् वनवासिनः "हा हतोऽस्मि" इति कारुण्यं वचनमाकर्ण्य साशंकं चिन्तितं

यन्मया शरेण कश्चिन्मानवस्तु नो व्यापादितः। अग्रे गतेन मयावलोकितो रुधिरार्द्रशरीरः कश्चिन्मुनिकुमारः। मां विलोक्य तेनाभिहितम्। राजन्! अपि तव शरेण विद्धोऽहम्? किं तेऽनुपकृतं मया? मां निघ्नता त्वया मेऽन्धौ पितरावपि हतौ। तत्र द्रुमतले उपविष्टयोस्तृषार्तयोस्तयोः कृते जलमानेतुमत्रागतोऽहम्। तत एतज्जघन्यकृत्यं संजातम्। पिपासाभिभूतौ तौ जलं पायय। वृत्तं चाखिलं श्रावय। अन्यथा कुपितौ तौ त्वां भस्मसात्करिष्यत इत्युक्त्वा पंचत्वं गतो मुनिकुमारः।

३—निम्नपदानां वाच्यपरिवर्त्तनं क्रियताम्–किं तेऽनुपकृतं मया। सद्यो गतेनं तत्रावलोकितः मुनिकुमारः। शब्दं लक्ष्यीकृत्य बाणमक्षिपम्।

——०००——

दशमः पाठः

दूतवाक्यम्

महाकवि भास का समय ई० सन् से दो वर्ष सौ पहले माना जाता है। इनका संस्कृतसाहित्य की नाट्य रचना में पथदर्शक का स्थान है क्योंकि यह महाकवि कालिदास से भी प्राचीन हैं। इनके नाटक सरल और रंगमंच पर खेलने योग्य हैं। इनके तेरह नाटक प्रसिद्ध हैं। इन नाटकों की रचना बृहत्कथा, रामायण, महाभारत और हरिवंश पुराण के कथानक के आधार पर हुई है। प्रस्तुत पाठ "दूतवाक्यम्" नाटक का अंश है।

पाण्डव बारह वर्ष के वनवास और एक वर्ष अज्ञातवास की अवधि समाप्त कर हस्तिनापुर लौट आते हैं। भगवान् श्रीकृष्ण धर्मराज युधिष्ठिर का सन्देश लेकर दुर्योधन के पास जाते हैं और उसका पाण्डवों को आधा राज्य देने की अनुमति देते हैं।

(ततः प्रविशति वासुदेवः काञ्चुकीयश्च)

वासुदेवः—(आत्मगतम्) अद्य खलु धर्मराजवचनात् धनंजयाकृत्रिममित्रतया च आहवदर्पमनुक्तग्राहिणं सुयोधनं प्रति मयापि अनुचितदौत्यसमयोऽनुष्ठितः। इदं सुयोधनशिबिरम्। इह हि—

आवासाः क्षत्रियाणां सुरपुरसदृशाः स्वच्छन्दविहिताः
विस्तीर्णाः शकशाला बहुविधकरणैः शास्त्रैरुपचिताः ।
क्लेपन्ते मन्दुरस्थास्तुरगवरघटा बृंहन्ति करिणः
ऐश्वर्यं स्फीतमेतत् स्वजनपरिभवाद्दासत्वविलयम् ॥ ३ ॥

भोः,

दुष्टवादी गुणद्वेषी शठः स्वजननिर्दयः
दुर्योधनो हि मां दृष्ट्वा नैव कार्यं करिष्यति ॥ ४ ॥
भो बादरायण ! किं मया प्रवेष्टव्यम् ।

: —अथ किम । प्रवेष्टुमर्हति पद्मनाभः ।

—(प्रविश्य) कथं कथं मां दृष्ट्वा सम्भ्रान्ताः सर्वे क्षत्रियाः । अलमलं सम्भ्रमेण । स्वैरमासतां भवन्तः ।

—भो द्रुत, एतदासनमास्यताम् ।

—(उपविश्य) अहो दर्शनीयोऽयं चित्रपटः । मा तावत् द्रौपदीकेशाम्बराकर्षणमत्र लिखितम् ।
अहः ! अदर्शनीयमेव चित्रपटः ।

—बादरायण ! अदर्शनीयः किम चित्रपटः ।

ः—मन्त्रापयति महाराजः (अपनयति)

—भो द्रुत ।

भो पाण्डुपुत्रस्य भीमो भ्राताऽर्जुनो मे त्रिदशेन्द्रसूनुः
सार्धं यमाभ्यां त्विन्नतो मयं मधुरगा: गुरुलोकयन्ताः ॥ ३ ॥

—सदृशमेतत् गान्धारीपुत्रस्य । अथ किम अथ किम् ।
दुर्योधनः सर्वं । अयमेव गर्वः गर्वः भ्रातृष्वन्तरे

च कुशलमनामयं च पृष्ट्वा विज्ञापयन्ति युधिष्ठिरादय पाण्डवाः ।

अनुभूतं महद्दुःखं सम्पूर्णः समयः स च ।
अस्माकमपि धर्म्यं यत दायाद्यं तद् विभज्यताम् ॥ ४ ॥

दुर्योधनः—कथं कथं दायाद्यम् इति भोः ?
वने पितृव्यो मृगयाप्रसंगतः कृतापराधो मुनिशापमाप्तवान्
तदा प्रभृत्येव स दारनिस्पृहः परात्मजानां पितृतां कः
व्रजेत् ॥ ५

वासुदेवः—पुराविदं भवन्तं पृच्छामि
विचित्रवीर्यो विषयी विपत्तिं क्षयेण जातः पुनरम्बिकायाम्
व्यासेन जातो धृतराष्ट्र एष लभेत राज्यं जनकः कथं ते ॥ ६
मा मा भवान्

एवं परस्परविरोधविवर्धनेन
शीघ्रं भवेत् कुरुकुलं नृपनामशेषम् ।
तत्कर्तुमर्हति भवानपकृष्य रोषं
यत्वां युधिष्ठिरमुखाः प्रणयाद् ब्रुवन्ति ॥ ७ ।

दुर्योधन - भो दूत । न जानाति भवान् राज्यव्यवहारम् ।
राज्यं नाम नृपात्मजैः सहृदयैर्जित्वा रिपून् भुज्यते
तल्लोके न तु याच्यते न तु पुनः दीनाय वा दीयते ।
कांक्षा चेन्नृपतित्वमाप्तुमचिरात् कुर्वन्तु ते साहसम्
स्वैरं वा प्रविशन्तु शान्तमतिभिर्जुष्टं शमायाश्रमम् ॥ ८ ।

वासुदेवः—अलमलं बन्धुजनं परुषमभिधातुम् ।
पुण्यसंचयसंप्राप्तामधिगम्य नृपश्रियम् ।
वञ्चयेद् यः सुहृद्वधून् स भवेद् विफलश्रमः ॥९॥

धनः=भो दूत

श्यालं तव गुरो भूपं कंसं प्रति न ते दया ।
कथमस्माकमेवं स्यात् तेषु नित्यापकारिषु ॥१०॥

देवः—अलं तन्मद्दोषतो दातुम्

कृत्वा पुत्रवियोगार्त्तां बहुशो जननीं मम
वृद्धं स्वपितरं बद्ध्वा हतोऽयं मृत्युना स्वयम् । ११

योधनः—न शौर्यमेतत् । अलमात्मस्तवेन । सर्वथा
वंचितस्त्वया कंसः । पश्य,

जामातृनाशव्यसनाभितप्ते
रोषाभिभूते मगधेश्वरेऽथ ।
पलायमानस्य भयातुरस्य
शौर्यं तदेतत् क्व गतं तवासीत् ॥१२

वासुदेवः—भो सुयोधन ! देशकालावस्थापेक्षि खलु शौर्यं नयानुगामिनाम् । इह तिष्ठतु तावदस्मद्गतः परिहासः । स्वकार्यमनुष्ठीयताम् ।

कर्त्तव्यो बन्धुषु स्नेहो विस्मर्त्तव्या गुणेतराः ।
संबन्धो बन्धुभिः श्रेयान् लोकयोरुभयोरपि ॥१३॥

दुर्योधनः—देवात्मजैर्मनुष्याणां कथं वा बन्धुता भवेत् ।
पिष्टपेषणमेवैतत् पर्याप्तं छिद्यतां कथा ॥१४॥

वासुदेवः—(आत्मगतम्)

प्रसाद्यमानः साम्नायं न स्वभावं विमुंचति ।
हन्त संक्षोभयाम्येनं वचोभिः परुषाक्षरैः ॥१५॥

(प्रकाशम्) भोः सुयोधन ! किं न जानीषे अर्जुनस्य बलपराक्रमम् ।

दुर्योधनः—न जाने ।

वासुदेवः—भोः श्रूयताम् ।

कैरातं वपुराश्रितः पशुपतिर्यत्नेन सन्तोषितो
वह्नेः खाण्डवमश्नतश्च महती वृष्टिः शरैश्छादिता ।
देवेन्द्रार्त्तिकरा निवातकवचा नीताः क्षयं लीलया
नन्वेकेन तदा विराटनगरे भीष्मादयो निर्जिता ॥ १६ ॥

अपि च तवापि प्रत्यक्षमपरं कथयामि ।
ननु त्वं चित्रसेनेन नीयमानो नभस्तलम् ।
विक्रोशन् घोषयात्रायां फाल्गुनेनैव मोचितः ॥ १७ ॥
किं बहुना,

दातुमर्हसि मद्वाक्याद् राज्यार्धं धृतराष्ट्रज ।
अन्यथा सागरान्तां गां हरिष्यन्ति हि पाण्डवाः ॥१८॥

दुर्योधनः—कथं कथं हरिष्यन्ति हि पाण्डवाः ।
प्रहरति यदि युद्धे मारुतो भीमरूपी ।
प्रहरति यदि साक्षात् पार्थरूपेण शक्रः ।
परुषवचनदक्ष ! त्वद्वचोभिर्न दास्ये
तृणमपि पितृभुक्ते वीर्यगुप्ते स्वराज्ये ॥१९॥

वासुदेवः—भोः कुरुकुलकलंकभूत !
शठ, बान्धवनिस्नेह, काक ! केकर ! पिंगल !
त्वदर्थात् कुरुवंशोऽयमचिरान्नाशमेष्यति ॥ २० ॥
भो भो राजानः ! गच्छामस्तावत् ।

प्रश्नाः

—पाण्डवाः किमर्थं वनं गताः ?

२—वासुदेवः सुयोधनं गत्वा किमवादीत् ?
३—वासुदेवदुर्योधनसंवादं संक्षेपेण देववाण्या लिखत ।
४—अस्मात्पाठात् बहुव्रीहिसमासपदान्युद्धृत्य सविग्रहं लिखत ।
५—अस्य पाठस्य कर्मवाच्यवाक्यानां कर्तृ वाच्ये परिवर्त्तनं विधेयम् ।

एकादशः पाठः

कलिधर्माः

इन पद्यों में कलियुगी मनुष्यों तथा महिलाओं के आचरण तथा अन्य कार्यों का विशद वर्णन किया गया है ।

कलेः स्वरूपं मैत्रेय यद् भवान श्रोतुमिच्छति ।
तन्निबोध समासेन वर्तते यन्महामुने ॥ १ ॥

वित्तेन भविता पुंसां स्वल्पेनाढ्यमदः कलौ ।
स्त्रीणां रूपमदश्चैव केशैरेव भविष्यति ॥ २ ॥

सुवर्णमणिरत्नादौ वस्त्रे चोपक्षये गते ।
कलौ स्त्रियो भविष्यन्ति तदा केशैरलंकृताः ॥ ३ ॥

गृहान्ताः द्रव्य संघाताःद्रव्यान्ता च तथा मतिः ।
अर्थाश्चात्मोपभोग्यान्ता भविष्यन्ति कलौयुगे॥४॥

विवाहा न कलौ धर्म्या न शिष्यगुरुसंस्थितिः ।
न दाम्पत्यक्रमो नैव वह्निदेवात्मकः क्रमः ॥ ५ ॥

सर्वमेव कलौ शास्त्रं यस्य यद्वचनं द्विज ।
देवता च कलौ सर्वा सर्वः सर्वस्य चाश्रमः ॥ ६ ॥

परित्यक्ष्यन्ति भर्तारं वित्तहीनं तथा स्त्रियः।
भर्ता भविष्यति कलौ वित्तवानेव योषिताम् ॥७॥
स्त्रियः कलौ भविष्यन्ति स्वैरिण्यो ललितस्पृहाः।
अन्यायावाप्तवित्तेषु पुरुषाः स्पृहयालवः ॥ ८ ॥
अभ्यर्थिताः च सुहृदा स्वार्थहानिं न मानवाः।
पणार्धार्दधमात्रेऽपि करिष्यन्ति कलौ द्विज ॥९॥
अनावृष्टिभयप्रायाः प्रजाः क्षुद्भयकातराः।
भविष्यन्ति सदा सर्वे गगनासक्तदृष्टयः ॥ १० ॥
कन्दमूलफलाहाराः तापसा इव मानवाः।
आत्मानं घातयिष्यन्ति ह्यनावृष्ट्यादिदुःखिताः ॥११॥
दुर्भिक्षमेव सततं तथा क्लेशमनीश्वराः।
प्राप्स्यन्ति व्याहतसुखप्रमोदा मानवाःकलौ ॥१२॥
लोलुपा ह्रस्वदेहाश्च बह्वन्नादनतत्पराः।
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः॥१३॥
उभाभ्यामपि पाणिभ्यां शिरः कण्डूयनं स्त्रियः।
कुर्वन्त्यो गुरुभर्तॄणामाज्ञां भेत्स्यंत्यनादराः॥१४॥
वानप्रस्था भविष्यन्ति ग्राम्याहारपरिग्रहाः।
भिक्षवश्चापि मित्रादिस्नेहसम्बन्धयन्त्रणाः ॥१५॥
अरक्षितारो हर्तारः शुल्कव्याजेन पार्थिवाः।
हारिणो जनवित्तानां सम्प्राप्ते तु कलौ युगे ॥१६॥
यदा यदा हि मैत्रेय हानिर्धर्मस्य लक्ष्यते।
तदा तदा कलेर्वृद्धिरनुमेया महात्मभिः ॥ १७ ॥
स्वल्पाम्बुवृष्टिपर्जन्यः सस्यं स्वल्पफल तथा।
फलं तथाल्पसारं च विप्र प्राप्ते कलौयुगे ॥१८॥

वाङ्मनःकायजैः दोषैरभिभूताः पुनः पुनः ।
नराः पापान्यनुदिनं करिष्यन्त्यल्पमेधसः ॥१६॥
कस्य माता पिता कस्य यथाकर्मानुगः पुमान् ।
इति चोदाहरिष्यन्ति श्वसुरानुगता नराः ॥२०॥
निस्सत्वानामशौचानां निह्रीकाणां तथा नृणाम् ।
यद्यद् दुःखाय तत्सर्वं कलिकाले भविष्यति॥२१॥
अल्पप्रज्ञाः वृथालिंगा दुष्टान्तःकरणाः कलौ ।
यतस्ततो विनंक्ष्यन्ति कालेनाल्पेन मानवाः ॥२२॥
किन्तु—
तत्राल्पेनैव यत्नेन पुण्यस्कन्धमनुत्तमम् ।
करोति तं कृतियुगे क्रियते तपसा हि सः ॥२३॥

प्रश्नः

१—कति युगाः ? तेषां विशिष्टत्वं वर्णयत ।
२—कलौ युगे मानवानामाचारः कीदृशः ?
३—पदविच्छेदपुरस्सरं सन्धिकार्यं प्रदर्श्यताम्—तन्निबोध, यन्महामुने, केशैरलंकृताः, अर्थाश्च ।
४—अस्मात्पाठात् भविष्यत्कालिकाः सकर्तृकाः क्रिया उद्ध्रियन्ताम् ।

(विष्णुपुराणात्)

द्वादशः पाठः

पण्डितः शत्रुरपि वरम्

पंचतन्त्र पं० विष्णुशर्मा की उत्तम कृति है। इसकी रचना ईसा की पाँचवी शताब्दी में हुई। इसमें (१) मित्रभेद (२) मित्र-संप्राप्ति (३) काकोलूकीय (४) लब्धप्रणाश (५) अपरीक्षितकारक पाँच विषय हैं। इसीलिये इसका नाम "पचतन्त्र" है। सरल एवं छोटी छोटी कहानियों द्वारा पं० विष्णुशर्मा ने गागर में सागर भर दिया है। ये कहानियाँ मनोरजक तो हैं हाँ पर उच्च शिक्षा-प्रद भी हैं। राजनीति का उपदेश जिस सरल ढंग से दिया गया है वास्तव में यह प्रशंसनोय है। इसकी शैली नवीन और उत्तम है। इस पुस्तक की सर्वोत्तमता एवं प्रियता का मुख्यप्रमाण यही है कि इसका अनुवाद फारसी, अंग्रेजी आदि विश्व की अनेक भापाओं में हो चुका है। शायद ही किसी ग्रन्थ का संसार की इतनी भापाओं में अनुवाद हुआ हो। संस्कृत के प्रारम्भिक छात्रों को यह पुस्तक बहुत उपयुक्त सिद्ध हुई है। प्रस्तुत पाठ इसी से लिया गया है।

एकस्मिन्नगरे कोऽपि विप्रो महान् विद्वान् परं पूर्वजन्म-योगेन चौरो वर्त्तते। स तस्मिन् पुरेऽन्यदेशादागतान् चतुरो विप्रान् बहूनि वस्तूनि विक्रीणतो विलोक्य चिन्तितवान्। अहो! केनोपायेन एषां धनं लभे। इति विचिन्त्य तेषां पुरोऽनेकानि शास्त्रोक्तानि सुभाषितानि चातिप्रियाणि मधुराणि वचनानि जल्पता तेषां मनसि विश्वासमुत्पाद्य सेवा कर्त्तुमारब्धा।

अथ तस्मिन् सेवां कुर्वति तैः विप्रैः सर्ववस्तूनि विक्रीय महामूल्यानि रत्नानि क्रीतानि। ततः तानि जंघामध्ये तत्समक्षं प्रक्षिप्य स्वदेशं प्रति गन्तुमुद्यमो विहितः। ततः स धूर्त्तविप्रस्तान् विप्रान् गन्तुमुद्यतान् प्रेक्ष्य चिन्ताव्याकुलितमनाः संजातः। अहो! धनमेतत् न किंचिन्मम चटितम्। अथैभिः सह यामि, पथि क्वापि विषं दत्त्वैतान्निहत्य सर्वरत्नानि गृह्णामि। इति विचिन्त्य तेषामग्रे सकरुणं विलप्येदमाह। भो मित्राणि! यूयं मामेकाकिनं मुक्त्वा गन्तुमुद्यताः। तन्मे मनो भवद्भिः सह स्नेहपाशेन बद्धं भवद्विरहनाम्नैवाकुलं संजातं यथा धृतिं क्वापि न धत्ते। यूयमनुग्रहं विधाय सहायभूतं मामपि सहैव नयतेति।

विप्रस्य वचः श्रुत्वा ते करुणार्द्रचित्तास्तेन सममेव स्वदेशं प्रति प्रस्थिताः। अथाध्वनि तेषां पंचानामपि पल्लीपुरमध्ये व्रजतां ध्वांक्षाः कथयितुमारब्धाः, रे रे किराता! धावत, धावत। सपादलक्षधनिनो यान्ति। एतान्निहत्य धनं नयत। ततः किरातैः ध्वांक्षवचनमाकर्ण्य सत्वरं गत्वा ते विप्रा लगुडप्रहारैर्जर्जरीकृत्य वस्त्राणि मोचयित्वा विलोकिताः, परं धनं किंचिन्न लब्धम्। तदा तैः किरातैरभिहितम्। भो पान्थाः! पुरा कदापि ध्वांक्षवचनमनृतं नासीत्। ततो भवतां सन्निधौ क्वापि धनं विद्यते, तदर्पयत। अन्यथा सर्वेषामपि वधं विधाय चर्म्म विदार्य प्रत्यङ्गं प्रेक्ष्य धनं नेष्यामः। तदा तेषामीदृशं वचनमाकर्ण्य चौरविप्रेण मनसि चिन्तितम्, यदा एषां विप्राणां वधं विधायाङ्गं विलोक्य रत्नानि नेष्यन्ति तदापि मां वधिष्यन्ति। ततोऽहं पूर्वमेवात्मानमरत्नं समर्प्यैतान् मुञ्चामि।

उक्तञ्च—

गवार्थे ब्राह्मणार्थे वा प्राणत्यागं करोति यः ।
सूर्यस्य मण्डलं भित्वा स याति परमां गतिम् ॥

इति निश्चित्याभिहितम् । भो किराता यद्येवं ततो मां हत्य विलोकयत इति । ततस्तैस्तथानुष्ठिते तं धनरहित-लोक्यापरे चत्वारोऽपि मुक्ताः । अतोऽहं ब्रवीमि—

पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारकः ।
किरातैर्लुण्ठकैः प्राप्ता विप्राश्चौरेण रक्षिताः ॥

प्रश्नाः V V. gup

—"पण्डितः शत्रुरपि वरम्" इति विषयमुररीकृत्य कांचिदन्यां क लिखत ।

—विग्रहपुरस्सरं समासाः लेख्याः—चिन्ताव्याकुलितमनाः, भव विरहनाम्ना, करुणार्द्रचित्ताः, गवार्थे, धनरहितम् ।

—विद्वान्, विक्रीणतः, पथि, सन्निधौ, एतेषां सर्वाणि रूपाणि लिख

—निम्नपदेषु सन्धयः सनियमं विश्लेष्याः—
चतुरोविप्रान्, तन्मे, दत्वैतान, यद्येवम्, चत्वारोऽपि ।

त्रयोदशः पाठः

राज्यश्रियोऽन्वेषणम्

महाकवि बाणभट्ट सन् ६०६-६४६ ई० उत्तरीय भारत म्राट् हर्षवर्धन के आश्रित कवि थे । कादम्बरी और हर्षचरि नके दो मुख्य ग्रन्थ हैं । कादम्बरी इनका सर्वश्रेष्ठ गद्य-का

है। महाकविने इसमें पात्रों का चरित्र-चित्रण इस खूबीसे किया है कि पढ़तेही बनता है। दैवदुर्विपाक से इस ग्रन्थको पूर्ण करने से पहिले ही इनका देहावसान हो गया। पुस्तक का शेषभाग इनके पुत्र ने लिखा जो कि उत्तरार्ध कहलाता है। "आत्मा वै जायते पुत्रः" के अनुसार पुत्र भी पिता के समान ही प्रतिभाशाली विद्वान् था। इस गद्य-काव्य के उत्तरार्ध को पढ़ कर यह विदित नहीं होता कि इसका लेखक कोई अन्य है। भाषा, शैली, चरित्र-चित्रण और वर्णन वैचित्र्य में जरा भी अन्तर नहीं आने पाया है। इनकी दूसरी कृति "हर्षचरित्र" है। इसमें महाराज हर्षवर्धन की विजय आदि का वर्णन है। प्रस्तुत पाठ इसी गद्य काव्य का अंश है।

ततः सत्वरम् उपससर्प ददर्श च मुह्यन्तीम् अग्निप्रवेशाय उद्यतां राजा राज्यश्रियम् आललम्बे च मूर्च्छामीलितलोचनाया ललाटं हस्तेन तस्याः ससम्भ्रम्। अथ तेन भ्रातुः प्रेयसः प्रकोष्ठबद्धानाम् ओषधीनां रसविसरमिव प्रत्युज्जीवनक्षमं क्षरता, वमता इव पारिहार्यमणीनाम्, अचिन्त्यप्रभवम्, अमृतमिव नखचन्द्ररश्मिभिः उद्गिरता, वध्नतेव चन्द्रोदयच्युतशिशिरशीकरं, प्रत्यानयता इव कुतोऽपि जीवितमाह्लादकेन हस्तसंस्पर्शेन सहसैव समुन्मिमील राज्यश्रीः। तथा च असम्भावितागमनस्य अचिन्तितदर्शनस्य सहसा प्राप्तस्य भ्रातुः स्वप्नदृष्टदर्शनस्य इव कण्ठे समाश्लिष्य तत्कालाविर्भावनिर्भरेण अभिभूतसर्वात्मना दुःखसम्भारेण निर्दयं नदीमुखप्रणालाभ्यामिव मुक्ताभ्यां स्थूलप्रवाहम् उत्सृजन्ती बाष्पवारि विलोचनाभ्यां हा तात! हा अम्ब! हा सख्य! इति व्याहरन्ती मुहुर्मुहुः उच्चैस्तरां च समुद्भूतभगिनीस्नेहसद्भावभारभावितमन्युना मुक्तकण्ठं विक्रुश्य वत्से! स्थिरा भव

त्वमित भ्राता करस्थितमुखी समाश्वास्यमानापि, कल्याणिनी ! कुरु वचनम् अग्रजस्य गुरोरिति आचार्येण याच्यमानापि, देवि ! न पश्यसि देवस्य अवस्थाम्, अलमतिरुदितेन इति राजलोकेन अभ्यर्थमानापि, स्वामिनी ! भ्रातरम् अवेक्षस्व इति परिजनेन विज्ञाप्यमानापि दुहितः ! विश्रम्य पुनः आरटितव्यमिति निवार्यमाणापि, वृद्धाभिः, प्रियसखि ! कियद्रोदिषि तूष्णीमास्स्व दृढं दूयते देव इति सखीभिः अनुनीयमानापि चिरसम्भावितानेकदुःसहदुःखनिवहनिर्वहण – वाष्पोत्पीडपीड्यमानकण्ठभागा प्रभूतमन्युभारभरितान्तःकरणा करुणकाहलेन स्वरेण कतिचित् कालं दीर्घं रुरोद । विगते च मन्युवेगे वहोः समीपात् आक्षिप्य भ्रात्रा नीता निकटवर्त्तिनि तरुतले निपसाद ।

प्रश्नाः

१—निम्नस्थपदानां विग्रहपुरस्सरं समासा लेख्याः—

मूर्च्छानिमीलितलोचनाया, नखचन्द्ररश्मिभिः, असम्भावितागमनस्य, वाष्पोत्पीडपीड्यमान कंटभागा ।

२—वाच्यपरिवर्त्तनं क्रियताम्—

राजा राज्यश्रियमालम्बे । भ्रात्रा नीता तरुतले निपसाद ।

२—सन्धिविच्छेदः क्रियताम्—

उच्चैस्तराम्, गुरोरिति, कुतोऽपि, सहसैव ।

चतुर्दशः पाठः

वासवदत्तोपाख्यानम्

श्रीवामन गोपाल उर्ध्वरेपे, एम० ए, ने महाकवि भास के नाटकों के कुछ अङ्क सन् १६४० ई० में संगृहीत कर सम्पादित किये हैं। उन नाटकों के कथानक के परिचय के लिये उर्ध्वरेपे जी ने संस्कृत गद्य में नाटकों का सार लिखा है। प्रस्तुत पाठ उसी का अंश है।

आसीत् पुरा वत्सेषु कौशाम्बी राजधानी। तत्र पाण्डव-वंशीय उदयनो नाम राजासीत्। तस्य च यौगन्धरायणोनाम मन्त्री कमण्वानाख्योऽमात्यश्च। महाराज उदयनो गानविद्यायां निपुणः, वीणावादने पटुश्चासीत्। वीणानादमाधुर्येण मदोन्मत्त-गजानां हृदयमपि स आकर्षत्।

अस्ति चण्डमहासेनो नाम अवंतीश्वरः तस्य च अंगारवती नाम महिषी गोपालकपालकनामानौ द्वौ पुत्रौ, सवलक्षणस-म्पन्ना अतीव रूपाढ्या दयादाक्षिण्यादिगुणवती च वासवदत्ता नाम्नी कन्या च।

वत्सेश्वरेण उदयनेन सह स्वकन्यायाः विवाहं कर्तु कामो महाराजश्चण्डसेनः तं वत्सराजं स्वराज्यसीमायाम् आगतं श्रुत्वा कृत्रिमस्नेहप्रदर्शनच्छलेनासहायं तं ग्राहयित्वा, स्वप्रासादे-ऽवरुध्य वासवदत्ताया वीणावादनशिक्षाकर्मणि नियुक्तवान्। तत्र अवरोधे वत्सराजवासवदत्तयोः रहसि प्रणयः प्रादुरभूत्। मन्त्रिणा यौगन्धरायणकौशलेन तस्मात् चण्डमहासेनस्य प्रासादात् मुक्तः स स्वप्रेयस्या वासवदत्तया सह अनुगम्यमानः वत्सदेशं प्रत्यापन्नः।

स्व राजधानीं कौशाम्बीं प्राप्त उदयनः सर्वं राज्यभारं यौगन्धरायणादिषु मन्त्रिषु समारोप्य, राज्ञ्या वासवदत्तया सह रममाणः सन् तत्सुखासक्तैकमानस आसीत्। स्वामिनः उदयनस्य राज्यकार्येषु उदासीनतां तस्य कामासक्तिं च प्रेक्ष्य सचेतीकुर्वतः राज्ञः राज्यविस्तारः कथं भविष्यति इति तस्य उपायान् चिन्तयमानानां मन्त्रिणां मनसि एवम् आसीत्। अस्माकम् उद्देश्यपूर्तौ मगधराजो दर्शक एव विरोधकारी भविष्यति। भाग्यवशेन मगधस्य भगिनी पद्मावती अविवाहिता अपि सा गुणवती शीलवती च। सा च केनाप्युपायेन उदयनस्य महिषी भविष्यति इति कस्यचित् सिद्ध पुरुषस्य अपि आदेशः श्रूयते। तत्प्रत्ययात् वत्सराजमंत्री यौगन्धरायणः अमात्येन रुमण्वता सह सम्मन्त्र्य राज्ञी वासवदत्ता लावाणकग्रामे अग्नौ दग्धा इति अपदिष्टवान्।

अवन्तिकावेषधारिणीं वासवदत्तामादाय परिव्राजकवेषेण यौगन्धरायणः 'इयं अविन्तिका मे भगिनी' प्रोषितभर्तृकाम् इमां परिपाल्यमानाम् इच्छामि इति संप्रार्थ्य तां च मगधेश्वरस्य भगिनीं पद्मावत्याः न्यासीकृत्य अपक्रान्तः।

यौगन्धरायणेन न्यासीकृतायाः वासवदत्तायाः सहवासेन पद्मावती प्रसन्नासीत्। वासवदत्ताविरहेण सतप्तः उदयनः केनापि प्रयोजनेन मगधराजधानीं राजगृह प्राप्तः सन् मगधेश्वरस्य भगिनीं पद्मावतीं महिषीत्वेन प्रतिजग्राह।

अथ कथाचित समुद्रगृहके पद्मावतीं प्रतिपालयन् उदयनः निद्रावशं गतः। अथान्तरे वासवदत्तापि तत्रैव प्राप्ता शयनीये पद्मावती स्वपिति इति बुद्ध्या सुप्तस्य उदयनस्य पार्श्वे स्थिता सती स्वप्ने दृष्टां वासवदत्तां प्रति, हा वासवदत्ते, हा अवन्ति राजपुत्रि, हा प्रिये, हा प्रियशिष्ये, देहि मे प्रतिवचनम्। किं

त्वं रुष्टा ? क्षमस्व ।" इति उत्स्वप्नायमानं वत्सराजं श्रुत्वा तस्मात् समुद्रगृहकात निश्चक्राम । प्रवुद्धः उदयनः 'धरते खलु वासवदत्ता अद्य मया सा दृष्टा' इति निश्चितार्थां वार्त्तां प्रियवयस्याय वसन्तकायाकथयत् । वसन्तकोऽपि 'अस्मिन् राजकुले रूपेण वासवदत्तासदृशी अवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति सा त्वया दृष्टा भवेन्' इति तस्य समाधानम् अकरोत् ।

अथ उदयनस्यामात्यः कमण्वान् महता बलसमुदायेन दर्शकस्य साहाय्येन च उदयनस्य वैरिणं आरुणिं पराजयत पश्चात् स्व राजधानीं प्राप्तः उदयनः सुखेन कालं निनाय ।

कस्मिंश्चित् समये अवन्तीश्वरेण चण्डमहासेनेन प्रस्थापितः रैभ्यसनामा कांचुकीयः महाराज्ञ्या अंगारवत्या च प्रेपिता आर्या वसुन्धरा नामा वासवदत्ताया धात्री च, द्वौ कौशाम्बीम् उपस्थितौ । तस्मिन्नेवावसरे वासवदत्ताप्रियघोषवतीं वीणां प्राप्य दुःखसागरे निमग्नो वत्सराज आसीत् कंचुकीयात चण्डमहासेनस्य कुशलवार्तां, परैः अपहृतं स्व राज्यं तेन पुनः प्रत्यानीतं च इति सन्देशः श्रुतः । अंगारवत्या अपि सन्देशं धात्री वसुन्धरा अकथयत् । उपरता वासवदत्ता मम वा महासेनस्य वा यादृशौ गोपालकपालकौ तादृश एव त्वं प्रथममेवाभिप्रेतः जामाता । एतन्निमित्तमेवोज्जयिनीम् आनीतः अग्निसाक्षिकं वीणाव्यपदेशेन तुभ्यं दत्ता वासवदत्ता । आत्मनः चपलतया अनिर्वृत्तविवाहमंगल एव गतो भवान् । अथ च आवाभ्यां तव च वासवत्तायाश्च प्रतिकृतिं चित्रफलकायाम् आलिख्य विवाहो निर्वृत्तः । एषा चित्रफलका तव सकाशं प्रेपिता । एतां प्रेक्ष्य निर्वृत्तो भवेति । चित्रफलकायां रेखितां वासवदत्तां दृष्ट्वा राजानम् अभिहितवती पद्मा-

नती। 'अति सदृशी खलु इयम् आर्याया अवन्तिकायाः। र
तु अवन्तिका मम कन्याभावे केनापि ब्राह्मणेन 'मम भगिनिक
इति न्यासो निक्षिप्त इति।'

तस्मिन्नेवावसरे यौगन्धरायणोऽपि स्वन्यासं ग्रहीतुं तत्रै
प्राप्तः। ब्राह्मणेन पद्मावत्या न्यासीकृताम् अवन्तिकां स्व
प्रेयसी वासवदत्ता इति प्रत्यभिज्ञाय ब्राह्मणोऽपि स्व-मन्त्री यौग
न्धरायण इति परिज्ञातवान्। तस्य मुखेनैव 'पद्मावति उदयनस
महिषी भविष्यति' इति पुष्पकभद्रादीनां सिद्धानाम आदेशः सर्वै
ज्ञातः। सर्वैरपि तथैव प्रयतितं प्रतिफलितं चेति श्रुत्वा परमां प्रीति
प्राप्तवान् महाराज उदयनः। स्वामिहितेषु रतस्य यौगन्धरा
यणस्य नीतिकौशलं ज्ञात्वा अतीव संतुष्टः स पद्मावतीवासव
दत्ताभ्यां स्वपत्नीभ्यां सह सुखेन कालं क्षपयामास।

प्रश्नाः

१—यौगन्धरायणस्य स्वामिभक्तिं वर्णयत।

२—अधोलिखितानां वाच्यपरिवर्त्तनं विधेयम्—

धात्री सन्देशमकथयत्। महाराज उदयनः परमां प्रीतिमाप्तवान्।

३—अधोलिखितानां विग्रहपुरस्सरमर्थाः लेख्याः—

वीणानादमाधुर्येण, कृत्रिमहस्तिप्रदर्शनच्छलेन, वासवदत्ताविरहेण, वासवदत्ताप्रियाम्।

४—निम्नलिखितेषु पदच्छेदपुरस्सरं सन्धिकार्यं प्रदर्श्यताम्—

पटुश्चासीत्। सुखासक्तैकमानसः, केनाप्युपायेन, वसन्तकोऽपि एतन्निमित्तम्।

तत्राप्यदत्तावसराः प्रवृत्तिं
ते पाण्डवास्तस्य कुतोऽप्यवाप्य।
जिघांसवः शीघ्रमनुप्लुतास्तं
शत्रुं महान्तोऽपि न शेषयन्ति॥२॥

ते वासुदेवप्रतिपन्नरश्मिं
पञ्चैकमारुह्य रथं प्रयाताः।
द्विपन्तमप्राप्य तदीयमीपुः
लक्ष्मापि संलक्षयितुं ह्रदान्ते॥३॥

जलोपसीम्नि द्विपतः पदानि
दृष्ट्वा तमन्तर्जलसन्निविष्टम्।
सर्वेऽवजग्मुः गदया च तानि
निर्लोडयामास पयांसि भीमः॥४॥

यन्नोदतिष्ठत् पयसस्तथापि
दुर्योधनस्तद्धि तुदन्नतीव।
वाचाम्बुवाहध्वनिधीरयैनं
युधिष्ठिरोऽभर्त्सयदेवमुच्चैः॥ ५॥

धिगस्तु दुर्योधन तेऽभिमानं
त्यक्त्वा तदैश्वर्यमयुध्यमानः।
प्रच्छादितात्मा निवसन्निहायं
जिजीविषुर्यन् क्षपितस्ववर्गः॥६॥

विहाय लक्ष्मीं बहु मन्यसे किं
ह्रदाम्बुगर्भे वसतिं जघन्याम्।
विनाश्य वा फल्गु यशः शरीरं
जुगुप्सितं भौतिकपिण्डमात्रम्॥७॥

न लंघनं वैरकृतं सहन्ते
जेतुं यथाशक्ति यतन्त एव ।
अन्ते च वीरा युधि कामयन्ते
शत्रौ बलीयस्यपि मानवन्तः ।।८।।
एते वयं पंच जिगीषवस्त्वा-
मतस्त्वमुत्तिष्ठ लभस्व युद्धं ।
निहत्य शत्रून्निह वाधिपत्यं
वीरोचितां प्रेत्य गतिं हतो वा ।।९।।
किं भूयसोक्तेन गृहाण शस्त्रं
युध्यस्व केनापि निजेच्छया नः ।
हन्याश्च यद्येकतरं कृती त्वं
जीवन् पुनर्भुङ्क्ष्व सुखेन राज्यम् ।।१०।।
वाक्सायकैरेवमतीव विद्धः
सुयोधनो मानधनो विजेत्रा ।
तोत्रार्दितो नाग इवासहिष्णुः
ह्रदान्तरादाविरभूत् गदाभृत् ।।११।।
स तिर्यगालोक्य पृथातनूजान्
भोगीव निःश्वस्य वृथाभिमानी ।
शिरो महाभोगनिभं विधुन्वन्
वचोविषं दुःसहमुज्जगार ।।१२।।
लिप्स्ये न राज्यं न जिजीविषामि
परन्तु वैरप्रतियातनाय ।
दुःशासनस्य द्विषताहमादौ
योत्स्ये यथाशक्ति वृकोदरेण ।।१३।।
मयैव युद्धं प्रथमं तवास्तु
सम्प्राप्तमेतच्चरमं च विद्धि ।

अथ जम्बूद्वीपे भारतवर्षे कोशलेषु जनपदे नानाजातीय-
शाखिशाखाशोभितदलकुसुमफलं शीतलविमलजलधरं-
नदं रत्नवाहं नाम नगरम्। तत्र च नगरे कुम्भकार एक
स्वशिल्पदक्ष आसीत्। तस्य तनयः तरुणिमानम् अधिगत्य
क्रीडासंसक्तः तत्र चैत्ये गृहादागत्य स्वैरं विविधक्रीडाभि
क्रीडतिस्म। तत्र एको नागकुमारः केलिप्रियतया कृतमानुष-
तनुः तेन कुम्भकारदारकेण सार्धं प्रत्यहं क्रीडितुं प्रवृत्तः
तत्पित्रा च स पुत्रः कुलालकर्माणि अविदधत् प्रतिदिन
दुर्वाचा उपालेभे। न च तद्वचनमसौ करोति स्म। तत
पिता गाढं प्रहृत्य बलात् स्वकर्माणि मृत्खननादीनि कार-
यितुम् उपक्रान्तः।

अन्तरमवलोक्य स पुनस्तत्र चैत्ये गत्वा अन्तरान्तर
तथैव तेन नागकुमारेण साकं खेलितुं प्रवृत्तः। पृष्टश्च नाग-
कुमारेण किं कारणं पूर्ववन्निरन्तरं न क्रीडयितुमायासि
तेनोक्तम्—जनकः कुप्यति मह्यम् स्वकर्मनिर्माणमन्तरेण
कथमिव जठरविवरपूरणम् उपपद्यत इति। तदाकर्ण्य नाग-
कुमारो वाचमुवाच—यद्येव तर्हि क्रीडान्ते भूपृष्ठे विलुठ
भविष्याम्यहमहिः मत्पुच्छं चतुरंगुलमात्रं छुरिकया छित्वा
त्वया ग्राह्यम्। तत् चारु चामीकरमयं भविष्यति। तेन हेम्ना
तव कुटुम्बस्य वृत्तिनिर्वाहो भविष्यतीति। स तथैव प्रति
दिवसं कर्तुं प्रवृत्तः। पित्रे तत् कनकमर्पयति स्म न च रहस्य-
मवदत्। अन्यदा अतिनिर्बन्धं विधाय पृच्छति सति पितरि
तथात् यथावस्थितमकथयत्। ततः सस्मितेन विस्मितेन च
जनकेन जगदे—रे मूर्ख चतुरंगुलमात्रमेव किमिति छिद्यतेऽपि
सकलं हि छिन्नं भूरिसुवर्णं लप्स्यते। तेन भणितं नाग
नागोऽतिनिरुपमं मनुष्यकुसुमं परमसुहृत्कथनात्। ततः

जनकेन लोभाकुलितमनसा तनये क्रीडार्थं तत् चैत्यम् उपेयुषि छन्नमनुगतम् । यावत् प्रक्रीड्य धरणीपीठे विलुठ्य स गत्वम् आपन्नः तावत् कुम्भकारेण बिलं प्रविशतस्तस्यार्धं : कुद्दालिकया चिच्छिदे । ततः कोपात् तेन नागकुमारेण-रे पिष्ठ, रहस्यभेदं करोपि इति कथयित्वा दारकोऽसौ दंष्ट्रा-पुटेन दष्ट्वा व्यापादितः तस्य पिता च ।

प्रश्नाः

—"लोभः पापस्य कारणमिति विषयमाश्रित्यकांचिदन्यां कथा लिखित ।

—नागकुमारेण किमर्थं दारकोऽसौ तज्जनकश्च दष्टः ?

—निम्नस्थपदानां अर्थं विलिख्य वाक्येषु प्रयोगः कार्यः— स्वशिल्प-छेका, तरुणिमानम्, अन्तरेण, अन्तरान्तरा, जठरविवरपूरणम्, चैत्यम् उपेयुषि ।

—अधोलिखितपदानां समासनामपुरस्सरं विग्रहः कार्यः—नानाजाती-यशाखिशाखाशोभितम् शीतलविमलजलधर्घरनदम्, क्रीडा-संसक्तः, कृतमानुषतनुः, लोभाकुलितमनसा ।

———

नवदशः पाठः

शिष्य-परीक्षणम्

दाक्षिणात्य श्रीपाद शास्त्री, न्याय, वेद, मीमांसा तीर्थ संस्कृत भाषा के एक प्रकाण्ड विद्वान् और उच्च कोटि के लेखक हैं। आपने "श्रीरामदासस्वामिचरितम" नामक ग्रन्थ सन् १९२२ ई० में लिखा। यह ग्रन्थ संस्कृत भाषा का अनुपम भण्डार है इसकी भाषा सरल और शैली प्रभावोत्पादक एवं सरल है। प्रस्तुत पाठ उक्त ग्रन्थ से लिया गया है।

एकदा श्री शिवराजः प्रतापगडदुर्गान्निर्गत्य महाबलेश्वरक्षेत्रमगच्छत्। तत्समीप एवारण्ये श्री समर्था अपि सन्तीति श्रुत्वा तद्दर्शनार्थं वनाद् वनान्तरं पर्यटत्। अत्रान्तरे महाराजः दूरवर्त्तिनि निकुंजे कस्यापि रोगार्तस्यातिकरुणं विलापमशृणोत्। दीनपालकः स शिवराजस्तत्क्षण एव धावंस्तस्मिन् निकुंजेऽनियत भूमौ लुठतः श्री समर्थान् वीक्ष्य परं दुःखाकुलोऽभवत्। शिवराजस्य त्वरितमेवाग्रे भूत्वा 'गुरुचरणाः' किं निमित्तम् इयमवस्था युष्माकं संवृत्ता ? को नाम रोगः ? केनौषधेन शाम्यति इत्यपृच्छत्। श्रीसमर्थास्तु-अरे शिवराज, किं कथयामि तात ! इदं दुःसहः उदररोगः, एष कदापि न शाम्यति इति कथमपि महता कष्टेनावदन्। अथ दुःखाकुले साश्रुलोचने शिवराजे "गुरो यद्यस्य किंचिदुपशामकमौषधं स्यात्तदा कथनीयम्, अहं च तत् समानयामीति, वदति सति श्री समर्थाः हा हन्त वत्स शिवराज, अस्त्येक उपायः परन्तु सोऽसत्सम एव, यदि तु तत्करणे समर्थः एव चेत् केवलं व्याघ्रीदुग्धमेवौषधं तेनोपशाम्यते नान्यत् किमपीत्यवादिषुः। श्रुत्वा चेदं

ाक्यं व्याघ्रीदुग्धानयनप्रवृत्तं शिवराजं श्री समर्थास्तथैव करुणया वाचाब्रुवन्। राजन् शिवराज, अहमस्मि भगवद्भक्तः केवलं शरीरयात्रालाभार्थमेव विचरामि। बहूनां पालयितुस्तव ाणा असाधारणा एव। तानमूल्यान् न मम कृते त्वं त्यक्तु-महंसीति। तदिदं श्री समर्थानां वाक्यमश्रुत्वैव भाण्डं गृहीत्वा ने सचरति श्रीशिवराजेऽतिनिबिडस्थानात् द्वौ व्याघ्रशिशू ुरस्तादागच्छताम्। तौ विलोक्य जातानन्दः स शिवराज-तत्स्थलं प्रविश्य व्याघ्रिमन्वैष्यत। अचिरादेव बालकरक्षणाय हसा जवेनागच्छन्ती क्रोधातिरेकरक्तनयनाक्रोशन्ती सा याघ्री शिवराजं कण्ठदेशेऽगृह्णात्। शिवराजस्तु तेन हिंस्र-शुनाक्रान्तोऽपि नाबिभेत्।

अथ निरुद्धेऽपि कण्ठदेशे शिवराजः स्वस्थमनाः—मातः याघ्रि, गुरुचरणरोगनिवृत्त्यर्थं त्वदीयं दुग्धमाहर्तुमहमत्रागतो तु त्वदीयबालकनयनार्थम्। तत् प्रसीद, देहि त्वं दुग्धमिति धैर्यमुवाच। ततश्च तस्मिन्नेव क्षणे विस्मृतस्वभावा सा व्याघ्री रमप्रीत्या शिवराजस्य गात्रमलेट्। शिवराजोऽपियथेच्छं धेनुवत् ां व्याघ्रिं दुग्ध्वा पर्याप्तं दुग्धं लेभे। तदानीमेव सः 'धन्योऽसि, त्स! शिवराज धन्योसि!! सत्यं तव गुरौ निष्ठा। यतस्त्वया ुरुसेवार्थं परमप्रियाः प्राणास्तृणीकृताः। अनेन भक्त्यतिरेकेण त्यमेव त्वं श्री गुरुप्रीतेः परमं पात्रं संवृत्तोऽसि, इति केनचित् हासमुच्चारितान् शब्दानशृणोत्। विस्मितश्च निवर्तितमुखः ुरोवर्त्तिनः अनन्दातिरेकसमुल्लसन्मुखकमलान् श्रीसमर्थान् ीक्ष्य साष्टांगं प्रणिपतन्-गुरुचरणाः! स भयंकर उदररोगः शान्तः किम् इत्यपृच्छत। श्रीसमर्थाश्च शिवराजस्येमं प्रश्नं नेशम्य हसन्तः वत्स! शिवराज!! त्वादृशेषु शिष्येषु सत्सु थं स उदररोगस्तिष्ठेत्? वत्स, नासीत् स रोगः किन्तु मयैव

केवलं तव परीक्षार्थं तथा समाचरितम्। अद्य प्रभृति त्वं खलु मम निर्विकारप्रीतेः पात्रं संजातोऽसि" इति प्रत्यूचुः। राजा शिवश्च तद्वचनमाकर्ण्य कियतीं मुदमलभतेति सुज्ञै वाचकै-रेवावधारणीयम्।

प्रश्नाः

१—समर्थगुरुणा किमर्थं व्याघ्रीदुग्धमानेतुमादिष्टः श्री शिवराजः ?

२—वाच्यपरिवर्तनं क्रियताम्—
व्याघ्री शिवराजं कंठदेशेऽग्रहणात्। परमप्रियाः प्राणास्त्वया तृणीकृताः।

३—निम्नपदेषु मूलशब्दान् विलिख्य तेषां रूपाणि लेख्यानि—
युवतः, वाचा, पुरोवर्तिनः, मरुतु, पालयितुः, प्रणिपतन्।

विंशः पाठः

स्फुट—पद्यानि

निम्न लिखित पद्य विभिन्न पुस्तकों से संकलित किये हैं। ये मनोरंजक तो हैं ही पर उच्च शिक्षाप्रद भी हैं।

निर्धना हि पण्डिता मूर्खास्तु कथं न तथा इति पृष्टा लक्ष्मीराह

मूर्खेषु द्रविणं ददासि कमले !
विद्वत्सु किं मत्सरः।
नाहं मत्सरिणी न चापि चपला,
नैवास्ति मूर्खे रतिः ॥

मूर्खेभ्यो द्रविणं ददामि नितरां
तत्कारणं श्रूयताम् ।
विद्वान् सर्वगुणेन भूषिततनुः
मूर्खस्य नान्या गतिः ॥१॥

आढ्यं गृहस्थाश्रमं वर्णयति—
सानन्दं सदनं सुताश्च सुधियः
कान्ता मनोहारिणी ।
सन्मित्रम् सुधनं स्वयोपितिरतिः
आज्ञापराः सेवकाः ।
आतिथ्यं सुरपूजनं प्रतिदिनं
मिष्टान्नपानं गृहे ।
साधोः संगमुपासते हि सततं
धन्यो गृहस्थाश्रमः ॥२॥

जरा हि इत्थं वदति—

कृतान्तस्य दूती जरा कर्णमूले
समागत्य वक्तीति लोकाः शृणुध्वम् ।
परस्त्रीपरद्रव्यवाञ्छां त्यजध्वं
भजध्व रमानाथपादारविन्दम् ॥ ३ ॥

पूर्वार्धं मृगयायां गृहमागच्छतः शिविकारूढस्य भोजराजस्योक्तिः, उत्तरार्द्धं च राजदर्शनार्थं गच्छतः शिविकावाहकपण्डितस्य प्रत्युक्तिः—

भूरिभारभराक्रान्तो वाधति स्कन्ध एप ते ।
न तथा वाधते स्कन्धो यथा 'वाधति' वाधते ॥४॥

पूर्वार्धे एका सखी स्वपतियोग्यतां वर्णयति, उत्तरार्धे च अन्या—

वाचयति नान्यलिखितं
लिखितमनेनापि वाचयति नान्यः।
अयमपरोऽस्य 'विशेषः
स्वयमपि लिखितं स्वयं न वाचयति ॥५॥

लक्ष्मीपार्वत्योः प्रश्नोत्तराणि—
भिक्षुः क्वास्ति वलेर्मखे,
पशुपतिः किं नास्त्यसौ गोकुले।
मुग्धे ! पन्नगभूषणः सखि !
सदा शेते स शेषोपरि।
दूरं मुञ्च विषादमाशु कमले
नाहं प्रकृत्या चला।
चेत्थं श्री गिरिजा-समुद्रसुतयोः
वाक्चातुरी पातु वः ॥ ६ ॥

श्रीकृष्णसत्यभामाप्रश्नोत्तराणि—
अंगुल्या कः कपाटे प्रहरति कुटिलो ?
माधवः, किं वसन्तो ?
नो, चक्री, किं कुलालो ? न हि धरणिधरः, ?
किं फणीन्द्रो द्विजिह्वः ?
मुग्धे ! घोराहिमर्दी, किमुत खगपतिः,
नो हरिः, किं फणीन्द्रः
इत्येव सत्यभामाप्रतिवचनजितः
पातु वः चक्रपाणिः ॥ ७ ॥

रिपव एव मानिनामभ्युदयनिदानमित्याह—
श्रीरामस्य दशाननो न छलवान्
दारापहारं यदि
अम्भोधिः क्व च सेतुबन्धघटना
क्वयोर्वार्य लंकाजयः।

पार्थस्यापि पराजयं यदि रिपुः
नाधात् क्व तादृक् तपः
नीयन्ते रिपुभिः समुन्नतिपदं
प्रायः परं मानिनः ॥ ८ ॥

कलिप्रभावं वर्णयति—

सीदन्ति सन्तो विलसन्त्यसन्तः
पुत्रा म्रियन्ते जनकश्चिरायुः ।
परेषु मैत्री स्वजनेषु वैरं
पश्यन्तु लोकाः कलिकौतुकानि ॥९॥

सन्तः क्वापि न सन्ति, सन्ति यदि वा
दुःखेन जीवन्ति ते
विद्वांसोऽपि न सन्ति, सन्ति यदि वा
मात्सर्ययुक्ताश्च ।
राजानोऽपि न सन्ति, सन्ति यदि वा
लोभात् धनग्राहिणः
दातारोऽपि न सन्ति, सन्ति यदि वा
सेवानुकूलाः कलौ ॥ १० ॥

मद्यपानगर्हणम्—

चित्ते भ्रान्तिर्जायते मद्यपानात्
भ्रान्तेचित्ते पापचर्यापुपैति ।
पापं कृत्वा दुर्गतिं यान्ति मूढाः
तस्मान्मद्यं नैव पेयं न पेयम् ॥ ११ ॥

प्रश्नाः

जरा किं वदति ?

"यथा वाधति वाधते" संशोध्य लेख्यमिदम् ।

अधस्तनश्लोकौ व्याख्येयो—

भिक्षुः क्वास्ति.................. । अगुल्या कः कपाटे..................

मानिन्-दार-रंतपस्-शब्दानां रूपाणि लेख्यानि ।

एकविंशः पाठः

ध्रुवधैर्यम्

ज्योतिर्विद् श्री शिवप्रकाश द्विवेदी संस्कृत के प्रौढ़ विद्वान् हैं। लक्ष्मी और सरस्वती प्रायः एकत्र नहीं रहतीं पर द्विवेदीजी इसके अपवाद हैं। आपने संवत् १६८३ वि० में "ध्रुवधैर्यम्" नामक खण्ड काव्य लिखा। आपकी रचना प्रसादगुणयुक्त, भाषा सुबोध और शैली परिमार्जित है। अनेक विद्वानों ने इस खण्ड काव्य की मुक्तकण्ठ से प्रशंसा की है। यद्यपि यह काव्य एक पौराणिक गाथा के आधार पर लिखा गया है तथापि कविता सरस और मनोहर है। इसके अध्ययन से छात्रों को चारित्र्य-शिक्षा भी प्राप्त होती है।

"ध्रुवधैर्यम्" के पढ़ने से ज्ञात होता है कि एक आर्य शिशु के अन्तःस्तल में सच्ची लगन और दृढ़ अध्यवसाय का सागर किस प्रकार हिलोरें ले रहा है। प्रस्तुत पाठ इसी काव्य से लिया गया है।

प्रणम्य विघ्नघ्नमना गजाननं
ध्रुवोऽपि तत्र प्रविवेश काननम् ।
गजव्रजो धीवरतः स्मितानना
गजार्दनेनापि नु पंचाननः ॥१॥
द्रुमप्रसूनैः स्फुटैः समन्विता
विभासमाना परिधानधारिणी ।
विराजिता शुभ्रजलैः मनोहरैः
सुसिन्धुगानैः नवैः पयोधरैः ॥२॥

ततोऽविशत् सोऽतिविभीषणाटवीं
समाकुलां जन्तुभिरामिषाशनैः ।
पदे पदे कण्टकिपादपान्वितां
बहुत्र नीचोच्चतराचलातलाम् ॥३॥
ततः समायादतिभासुरं महो
महद्दिनेशद्युति भासिताम्बरम् ।
किमित्यहो विस्मयमानसस्ततः
ददर्श गोत्रेशसुतः ससाध्वसम् ॥४॥
अटन् अटव्यां च रटन् हरे गुणान् ।
स्वतेजसोद्दीप्तपवित्रविग्रहः ।
लसन् विवस्वानिव वल्लकीकरो
जटाकलापाकलनस्फुटो मुनिः ॥५॥
अनात्मजो भक्तिविरक्तिमण्डितः
अकामगो विग्रहसन्धिपण्डितः ।
मुरारिनामस्मरणे विशारदः
समागतस्तत्र सुरर्षिनारदः ॥६॥
अलौकिकांगप्रतिभं विलोकयन्
शिशुं शिरीषप्रसवांगकोमलम् ।
भुवि स्थितं बालरविप्रभं ध्रुवं
बभूव वात्सल्यरसाप्लुतो मुनिः ॥७॥
महाटवीमध्यगतं सुबालकं
च्युतालकं वीक्ष्य समाहितं यथा ।
मुहुर्मुहुः विस्मितचेतसा मुनिः
करेण पस्पर्श विनम्रमूर्धनि ॥८॥
अवेहि मां वत्स सुतं स्वयंभुवः
परोपकारप्रसितं हि नारदम् ।

अभीष्टसंसिद्धिपथप्रदर्शकं
व्यपेतभीतिः कथयात्महृद्गतम् ॥९॥

ध्रुवः समाकर्ण्य मुनीन्द्रभाषितं
विभाव्य तं चात्मगतेष्टसाधकम् ।
उवाच वाचातिविनीतया ततः
प्रणद्धपाणिः प्रणिपत्य पादयोः ॥१०॥

मनोगतं वेद भवान् तथाप्यहं
वदामि मां विद्धि मनोः सुतात्मजम् ।
ध्रुवाभिध न्यस्तसमस्तसम्पदं
ध्रुवात्मदास्या [illegible] तप्तुमागतम् ॥ ११ ॥

अवाप्य लप्स्ये तपसात्मवांछितं
परेश्वरं कौस्तुभरत्नलांछितम् ।
निशम्य वाणीमिति मागणोदितां
विहस्य देवर्षिरुवाच नारदः ॥ १२ ॥

क ते कुमाराभिमतं क ते वपुः
नवप्ररूढद्रुमपर्णपेलवम् ।
क [illegible] दुस्तपसावधारणैः
[illegible]नमात्रवृत्तिभिः ॥ १३ ॥

निशम्य तत् प्रत्यवदन् नृपात्मजो—
[illegible] परावर्तयितुं न सेश्वरः ।
[illegible] यथा [illegible] विनिर्गतो
[illegible] हि [illegible] ॥ १४ ॥

[illegible] [illegible] [illegible] समाहिता
[illegible] मे भगवन् [illegible] ।

ध्रुवप्रतिज्ञामवगम्य नारदः
उदाजहारोत्पुलको मुनि मुंदा ॥१५॥
सुदर्शनांगं वनमालिनं विभुं
सुपर्णगं कौस्तुभशोभ्युरःस्थलम् ।
पयोधिजापीडितपादपुष्करं
समर्च्चतां हृद्गतपुष्कराश्रितम् ॥१६॥
परिष्यति त्वत्त पितं परेश्वरः
सनोति कैवल्यपदं स केवलम् ।
ततः सं ईशः शरणं प्रपद्यतां
वरप्रदं तच्चरणं समर्च्यताम् ॥१७॥
आदिष्टः सुरमुनिनेति बृंहितौजा
बालोऽसौ मुदितमना गृहीतदीक्षः ।
देवर्षेश्चरणयुगं प्रणम्य यातः
तद् विष्णोः पदसृतिपूतरेणवरण्यम् ॥१८॥

प्रश्नाः

१—ध्रुवः किमर्थं गृहं परित्यज्य वनं गतः ?
२—वनशब्दस्य पर्यायवाचिनः शब्दा लेख्या ।
३—अस्मात् पाठात् बहुव्रीहिसमासपदानि उद्धृत्य विलिखत ।
४—आमिष, विशारद, शिरीष, आप्लुत, च्युत, न्यस्त रद, कैवल्य—शब्दानामर्थाः लेख्याः ।

द्वाविंशः पाठः

दरिद्राणां हृदयम्

साहित्याचार्य श्री नारायण शास्त्री, जिस्ते संस्कृत भाषा के प्रौढ विद्वान और सफल लेखक हैं। आप गवर्नमेंट संस्कृत लाईब्रेरी (सरस्वती भवन) काशीके अध्यक्ष हैं। आप ने सन् १६३० ई० में शृङ्गार और करुणरस पूर्ण उपन्यास लिखा जिसका नाम "दरिद्राणां हृदयम् अथवा राजधर्म" है! इसकी भाषा प्रांजल और मुहावरेदार है। लेखक ने पात्रों के चरित्रचित्रण में पूर्ण सफलता पाई है। शैली रोचक और सरल है। प्रस्तुत पाठ उक्त उपन्यास का अंश है।

राजकुमारः कृष्णरायः सभायामानीतः। महाराजैः करुणोपस्थापितस्याभियोगस्य स्वरूप मद्योपतः कृष्णरायाय कथितं पृष्टं च–"कृष्णराय, अस्या अनाथायाः पतिस्त्वया हतः किम्?"

कृष्णरायः कियन्तचित् कालमधोमुखः सत्रपतस्थे। ततः शिरः समुन्नम्य प्राह–महाराज, यद्यपि अहं यौवनोन्मत्तो दुष्टो वा भवेयं, तथापि भवादृशस्य सत्पुरुषस्य तनुजोऽस्मि। मम कुलमपि समुन्नततमम्। असत्यभाषणं कृत्वा नाहं पापमर्जयितुमिच्छामि! योऽयं वृत्तान्तः श्रीमता कथितः सः सर्वोऽप्यक्षरशः सत्यः, किन्तु मया क्रोधावेशे तस्य वधः कृत इति नु सत्यमेव।

कृष्णरायं तीक्ष्णं दृष्ट्या पश्यन्तो महाराजाः गम्भीरस्वरेण प्राहुः–कृष्णराय, त्वं यद्यपि मम पुत्रोऽसि तथापीदानीं मम सामान्यप्रजाजन इव मम पुरः समुपस्थितोऽसि, येनापि कस्यापि वधे कृते तस्य किं शासनं भवतीति तु तव विदितमेव-

स्यात ? कृष्णरायः प्राह–"आम् महाराज ! स प्राणदण्ड लभते इति मम विदितम्। किन्तु अहं यद्यपि न राजा, तथापि राजपुत्रोऽस्मि। क्षणिके क्रोधावेशे यदि मया स्व प्रजाजनेष्वेकस्य वधः कृतस्तर्हि तदर्थं ममप्राणदण्डो भवितुं नार्हति। मयायं घोरोऽपराधः कृति इति स्वीकरोमि। तदर्थं च मम भूयाननुतापः संजातः। इयं दीना स्त्री वैधव्यमूलं दारिद्र्यं यथा नानुभवेत् तथा व्यवस्थां विधातुमहमुत्सुकोऽस्मि।"

कृष्णरायस्य तदुदितं शृण्वन्त्याः करुणायाः नेत्राभ्यामग्नि ज्वाला समुल्लास। स सन्तापातिरेकेणाह–"त्वं कां व्यवस्थां चिकीर्षसि रे अधम ! त्वया स्वहस्तेन वैधव्यवैश्वानरे यस्या जीवनमाहुतिकृतं तस्याः सन्ताप शमयितुं कीदृशं धन तवान्तिके वर्त्तते ? नीच ? दुष्ट ! अस्मिन् जगति यन्मम सुखसर्वस्वमासीत्, यन्मम आशानां निधानमासीत् तत् त्वया स्व हस्तेन दग्धम्। इदानीं मम दुःखदूरीकरणस्य कथां कथयसि। धिक् ते जीवनं सहस्रवारं धिक्। कुलांगार ! शृणु त्वया मम हृदयमेव—।"

कृष्णरायस्तस्या दुर्वाच्यैः क्रोधान्धो भूत्वा जगाद। "तव हृदयं, दरिद्राणामपि हृदयं भवतीति अद्यैव मया प्रथमतः श्रुतम्।"

महाराजाः क्रुद्धाः सन्तः तारस्वरेणोचुः—तूष्णीं भव मूर्ख कृष्णराय, त्वं राजपुत्रोऽपि सन् राजा न भवसि। किञ्च राज्ञोऽपि ईदृशानामपराधानां क्षमा नास्त्येव। अद्य मम सिंहासनस्य पुरः त्वम् अन्यो वा कश्चित् प्रजाजनः समान एव, न कश्चित् भेदो मे प्रतिभासते। कस्यापि सामान्यजनस्य कृते यादृशो दण्डो दीयेत, तादृश एव तवापि स्यात्। अहं खलु राज-

द्वाविंशः पाठः

दरिद्राणां हृदयम्

साहित्याचार्य श्री नारायण शास्त्री खिस्ते संस्कृत भाषा के प्रौढ विद्वान और सफल लेखक हैं। आप गवर्नमेंट संस्कृत लाइब्रेरी (सरस्वती भवन) काशी के अध्यक्ष हैं। आप ने सन् १९३० ई० में शृङ्गार और करुणरस पूर्ण उपन्यास लिखा जिसका नाम "दरिद्राणां हृदयम् अथवा राजधर्म" है। इसकी भाषा प्रांजल और सुग्रालंकार है। लेखक ने पात्रों के चरित्रचित्रण में पूर्ण सफलता पाई है। शैली रोचक और सरल है। प्रस्तुत पाठ उक्त उपन्यास का अंश है।

राजकुमारः कृष्णरायः सभायामानीतः। महाराजैः करगोपस्याधिनस्याभियोगस्य स्वरूपं संक्षेपतः कृष्णरायाय कथितं पृष्टं च—"कृष्णराय, अस्या अनाथायाः पतिस्त्वया हतः किम् ?"

कृष्णरायः किञ्चित्कालमधोमुखः समवतस्थे। ततः शिरः समुन्नम्य प्राह—महाराज, यद्यपि अहं यौवनोन्मत्तो दुष्टो वा भवेयं, तथापि भवादृशस्य सत्पुरुषस्य तनुजोऽस्मि। मम कुलमपि सत्कुलमेव। असत्यभाषणं कृत्वा नाहं पापसंचयितुमिच्छामि ! योऽयं वृत्तान्तः श्रीमता कथितः सः सर्वोऽप्यक्षरशः सत्यः, किन्तु मया कोपावेशात् तस्य वधः कृत इति नु सत्यमेव।

कृष्णरायं धीरं दृष्ट्वा पत्न्यो महाराजाः गम्भीरस्वरेण प्राहुः—कृष्णराय, त्वं यद्यपि मम पुत्रोऽसि तथापि प्रजानां मम सन्तानवत् इव मम पुरः समुपस्थितोऽसि, तेनापि करगोपवधे तव दण्डं कर्तुं मया विधिनिषे-

स्यात् ? कृष्णरायः प्राह-"आम् महाराज ! स प्राणदण्ड लभते इति मम विदितम् । किन्तु अहं यद्यपि न राजा, तथापि राजपुत्रोऽस्मि । क्षणिके क्रोधावेशे यदि मया स्व प्रजाजनेष्वेकस्य वधः कृतस्तर्हि तदर्थं ममप्राणदण्डो भवितुं नार्हति। मयायं घोरोऽपराधः कृति इति स्वीकरोमि। तदर्थं च मम भूयाननुतापः संजातः। इयं दीना स्त्री वैधव्यमूलं दारिद्र्यं यथा नानुभवेत् तथा व्यवस्थां विधातुमहमुत्सुकोऽस्मि।"

कृष्णरायस्य तदुदितं शृण्वन्त्याः करुणायाः नेत्राभ्यामग्नि ज्वाला समुल्लास। स सन्तापातिरेकेणाह-"त्वं कां व्यवस्थां चिकीर्षसि रे अधम ! त्वया स्वहस्तेन वैधव्यवैश्वानरे यस्या जीवनमाहुतिकृतं तस्याः सन्ताप शमयितुं कीदृश धन तवान्तिके वर्त्तते ? नीच ? दुष्ट ! अस्मिन् जगति यन्मम सुखसर्वस्वमासीत्, यन्मम आशानां निधानमासीत् तत् त्वया स्व हस्तेन दग्धम्। इदानीं मम दुःखदूरीकरणस्य कथां कथयसि। धिक् ते जीवनं सहस्रवारं धिक्। कुलांगार ! शृणु त्वया मम हृदयमेव—।"

कृष्णरायस्तस्या दुर्वाच्यैः क्रोधान्धो भूत्वा जगाद। "तव हृदयं, दरिद्राणामपि हृदयं भवतीति अद्यैव मया प्रथमतः श्रुतम्।"

महाराजाः क्रुद्धाः सन्तः तारस्वरेणोचुः—तूष्णीं भव मूर्ख कृष्णराय, त्वं राजपुत्रोऽपि सन् राजा न भवसि। किञ्च राज्ञोऽपि ईदृशानामपराधानां क्षमा नास्त्येव। अद्य मम सिंहासनस्य पुरः त्वम् अन्यो वा कश्चित् प्रजाजनः समान एव, न कश्चित् भेदो मे प्रतिभासते। कस्यापि सामान्यजनस्य कृते यादृशो दण्डो दीयेत, तादृश एव तवापि स्यात्। अहं खलु राज-

पत्यु र्निधनेन नारीणां कीदृशं दुःखं भवतीति त्वया सम्यक् अनुभूतम्। अतः त्वमेव मम भाविदुःखं कल्पयितुं बाढं प्रभवसि अस्य राजसिंहासनस्य पुरः आवामुभे अपि समदुःखे समागते स्वः। त्वमबलाजातिरसि, अहमपि तथ। त्वमात्मानं मम सोदरां भागिनीमवगच्छ। तव पतिर्नष्टः तस्य दारुणदुःखं त्वयानुभूयत एव, तर्हि किमिति मामपि तेनैव दुःखेन दुःखितां करोषि। भगिनि! दयस्व प्रसीद मा मां वैधव्यदुःखे निपातय। देहि मे पत्युः प्राणभिक्षाम्, स्त्रीजातिरपि त्वं वैधव्यदुःखमनुभवन्त्यपि आत्मन एवान्यां भगिनीं दुःखाद् वैधव्यदुःखे निपातयितुं कथमुत्सहसे? यदि परलोके पत्युः चिरवासं नाभ्यगमः, तर्हि अद्य मां भर्त्रा वियुक्तां न कुर्याः भगिनि, इयतीं भिक्षामवश्यं देहि मे।"

[illegible] नेत्रयोः प्रतिहिंसाव्यञ्जिका या भीषणा दीप्तिः [illegible] राजन्याया ईदृशैः परिदेवितैः [illegible] विलीना। कल्याणी महाराजन्याः स्वकीयदुर्बल- [illegible] महाराजानाह्—"महाराज, [illegible] स्त्रीजातिः [illegible] मया। [illegible] भगिनीमाहूनि- [illegible] प्रतिनिवर्त्यते मया। [illegible] न्यायाभ्यर्थना, [illegible] [illegible] सभाभिन- [illegible]।

[illegible]

निदर्शनभूतासि, किन्तु राजसिंहासनस्य राजधर्मः कमपि सन्तुं न शक्नोति। नरहत्यायां प्राणदण्ड एव शासनं नियतं राजधर्मस्तु प्राणनाशो प्राणमेव कामयते, केनापि कियत्यपि प्रार्थिते राजधर्मः स्वमधिकारं परित्यक्तुं न प्रभवतीति।"

अथ करुणा क्षणं तूष्णीं स्थिता। ततः सा महाराजान् पुनराह—महाराज, प्राणविनिमये प्राण एव राजधर्मस्याभिमतः तर्हि गृह्यतामयं मे प्राणः, तद्विनिमयेन विमुच्यतां राजकुमारः, दीयतां तस्मै प्राणभिक्षा, इयमेव मे चरमाभ्यर्थना।

इत्थं वदन्त्यैव तया सहसा वसनान्तरात् तीक्ष्णा छुरिका निष्कासिता। महाराजा भाविनमनर्थं सम्भाव्य यावत् सिंहासनादवतरन्ति तावदेव तया आमूलं सा स्वहृदये निखाता। छिन्नमूल इव द्रुमः सा सद्यः पपात भूमौ। इत्थं यस्या दुःसहस्य जीवितस्यावसानं जातम्। अन्तसमये एकां भगिनीं तत्पतिप्राणदानेन सौभाग्येन संयोजयन्ती हतभागधेया सा मूर्तिमतीव करुणा, प्रेमदेवता करुणा परलोके जीवितेश्वरेण चिरमेलनमभिलषन्ती दिव्यं धाम जगाम।

कृष्णराय, पश्य इदं तावत्-"दरिद्राणां हृदयम्" इत्येव महाराजैरुक्तम्। महाराजकुक्करायैः करुणायाश्चरमाभ्यर्थना स्वीकृतैव। कृष्णरायो न प्राणदण्डेन दण्डितः। एकस्मिन् प्रत्यन्तदुर्गे यावज्जीवनं कारागारे निवास एव तस्य दण्डो निर्दिष्टः। अपहृतश्च तस्य यौवराज्याधिकारः, प्रेषितश्च कुमारः कारागारम्।

प्रश्नाः

१—"[illegible] [illegible]" [illegible] इति विषयमुररीकृत्य [illegible] निबन्धो [illegible]।

२—"[illegible] [illegible] [illegible]" [illegible] व्याख्याभेः लिखित।

३—का शिक्षा [illegible] [illegible]?

४—[illegible] [illegible] विग्रहः [illegible], अर्थश्च लेख्यः—
[illegible], [illegible], अंगारवर्णनिभितम्, प्राण-[illegible], [illegible], [illegible]।

चतुर्दशः पाठः

रणनीतिः

[illegible] [illegible] [illegible] ने [illegible] [illegible] वि० में "महाभारत" [illegible] [illegible] में [illegible] किया जिसका नाम "[illegible]" है।

सम्भवतः इसकी रचना ईसा से एक हजार वर्ष पूर्व हो चुकी थी। अनेक विद्वानों का मत है कि महाभारत का कलेवर समयानुसार बढ़ता रहा है। प्रस्तुत पाठ गद्य-भारत से लिया गया है।

अथ प्रभाते दुर्योधनवाक्शल्यैरर्दितः द्रोणाचार्यः क्रुधा दिव्यास्त्रैरनस्त्रानपि ददाह। पुनर्निर्मर्यादे युद्धे प्रवृत्ते द्रोणेन वध्यमानानां सैन्यानां तुमुलाक्रन्दोऽभवत् एवमालोक्य व्योमचारिणः किमयं रुद्रोऽकालकल्पान्ते लोकान् संहर्त्तुमुद्यत इति सशंकिरे। ततः द्रोणसायकैः पीडामवाप्य वीरवराः क्षत्रियाः शर्म नालभन्त। अथ विराटद्रुपदौ शितशरैः भारद्वाजं सञ्छाद्य वार्द्धक्येऽपि सर्ववीराणां तूर्णं विस्मयमुत्पादयामासतुः। द्रोणाचार्यं विपुलविक्रमौ विराटद्रुपदावपि विव्याध मुहूर्त्तं तेन सह युध्यमानौ विराटद्रुपदौ वीरगतिमलप्साताम्।

अथ कंसारिः पाञ्चालचेदिमत्स्यानां नृपाणां रणे कदनं कुर्वाणं गुरुं समीक्ष्य पाण्डुनन्दनं पार्थं बभाषे। सखे! दिव्यास्त्रज्वालावान्, क्षत्रियानलोऽयं जामदग्न्यशिष्यः समुखागतोऽस्ति। अतो महोपायं विना न केनापि सोढुं पार्यते। यतः सर्वात्मना युध्यमानोऽयं गुरुरद्यैव जगन्निष्पाण्डवं कर्त्तुमुद्यत इत्यहं जाने। एष पुत्रं निहतं श्रुत्वा ध्रुवं न योत्स्यते। तस्माद् युक्तिमुपाश्रित्य जयार्थं नीतिर्विधीयतामिति तच्छ्रुत्वार्जुने कर्णौ पिधाय निम्नाननेन स्थिते, युधिष्ठिरे च मूके, भीमसेन एव यदुनाथाभिप्रायमवलम्बमानो गदयाश्वत्थामाभिधं मत्तकुंजरं हत्वा द्रोणाग्रे पुत्रवधमुच्चैरश्रावयत। निशम्यैव द्रोणस्तनयं दुर्जयं मत्वा भीमं च संकुचितं विलोक्य प्रत्ययं नागमत्। सोऽथ धृष्टद्युम्नजिघांसया पांचालान् प्रविश्य वीरयोधानां सरथसैन्यानि जघान। ततस्तत्र द्वितीयो रुद्र इव क्रुद्धः द्रोणो ब्रह्मास्त्रेण चेदिपांचालमत्स्यवीरानदहत्। ततः स भीमवचः

स्मृत्वा शङ्कितधिया सत्यविक्रमं युधिष्ठिरमपृच्छत् । गोविन्द-प्रार्थितो युधिष्ठिरः लोकमाप्तस्यान्तेऽश्वत्थामा हतो नरो वा कुञ्जरो वा इत्यभाषत । अत्रान्तरे ते रथा युधिष्ठिरं वहन्तो भूमिं नास्पृशन् ते असत्यभाषणात् भूमिगामिनोऽभवन् ।

ततः सचिवनायकैः मर्मविद्ध इव द्रोणः स्ववधं निश्चित्य निर्भिन्न हृदयोऽशनैः पश्चात्तापरः कटुवार्तां शृण्वन्तो इदमवदत् । अहो नु ! बालको मृत्वापि पिशिताशीव नितरांऽपि पुत्रे कलुषं कर्म करोतीति । निराशेन द्रोणः क्रुधा सह चापं त्यक्त्वा योगमास्थाय न परन्तः ज्योतिः स्वरूपं दृष्ट्वा । ततस्तस्य ब्रह्मरन्ध्रनिर्गतं ज्योतिः सहसा ज्योतिषि समाविवेश । योधिनां युध्यमानः पार्षतैः निवार्यमाणोऽपि केशेष्वाकृष्य धृष्टद्युम्नः असिनाच्छिनत् गुरोः शिरः तदा नाक्रन्दत् ! तस्यां दुःखदशां सर्वेऽपि सर्वे तदा युधिष्ठिरं गुरुः धृष्टद्युम्नं निन्दन् । एवं च द्रोणाचार्ये गते कौरवपक्षीया महारथा भयभीताः सन्तस्तान् पलायन्त ।

पंचत्रिंशः पाठः

सिद्धार्थ-जिज्ञासा

प्रसिद्ध बौद्ध कवि अश्वघोष का काल सन् ७८ ई० माना जाता है। इनके लिखे हुए बुद्धचरित, सौन्दरनन्दन आदि कई ग्रन्थ उपलब्ध हैं। इनकी गणना संस्कृत के दर्शनि कवियों में होती है। इनकी रचनाओं में महाकवि कालिदास के काव्यों का प्रतिबिम्ब पड़ा है। बुद्धचरित में रघुवंश और कुमारसम्भव की छाया प्रत्यक्ष दिखाई देती है। प्रस्तुत पाठ "बुद्धचरित" से लिया गया है।

ततः कुमारो जरयाभिभूतं,
दृष्ट्वा नरेभ्यः पृथगाकृतिं तम्।
उवाच संग्राहकमागतास्थः,
तत्रैव निष्कम्पनिविष्टदृष्टिः ॥ १ ॥
क एष भोः सूत नरोऽभ्युपेतः,
केशैः सितैः, यष्टिविषक्तहस्तः।
भ्रू संवृताक्षः शिथिलाननतांगः,
किं विक्रियैषा प्रकृति र्यदृच्छा ॥ २ ॥
सारथिरुवाच—
रूपस्य हर्त्री व्यसनं बलस्य,
शोकस्य योनिः निधनं रतीनाम्।
नाशः स्मृतीनां रिपुरिन्द्रियाणा—
मेषा जरा नाम ययैष भग्नः ॥ ३ ॥
पीतं ह्यनेनापि पयः शिशुत्वे,
कालेन भूयः परिमृष्टमुर्व्याम्।

स्थूलोदरः श्वासचलच्छरीरः,
स्रस्तांसबाहुः कृशपाण्डुगात्रः।
अंवेति वाचं करुणं ब्रुवाणः,
परं समाश्लिष्य नरः कः एष ॥ १० ॥

ततोऽब्रवीत् सारथिरस्य सौम्य,
धातुप्रकोपप्रभवः प्रवृद्धः।
रोगाभिधानः सुमहाननर्थः
शक्रोऽपि येनैष कृतोऽस्वतन्त्रः ॥ ११ ॥

इत्यूचिवान् राजसुतः स भूयः,
तं सानुकम्पो नरमीक्षमाणः।
अस्यैव जातः पृथगेष दोषः,
सामान्यतो रोगभयं प्रजानाम् ॥ १२ ॥

ततो बभाषे स रथप्रणेता,
कुमार साधारण एष दोषः।
एवं हि रोगैः परिपीड्यमानो,
रुजातुरो हर्षमुपैति लोकः ॥ १३ ॥

निवर्त्यतां सूत बहिः प्रयाणात्,
नरेन्द्र सद्मैव रथः प्रयातु।
श्रुत्वा च मे रोगभयं रतिभ्यः,
प्रत्याहतं संकुचतीव चेतः ॥ १४ ॥

ततोऽन्यतमस्मिन् दिवसे मृतं पुरुषं विलोक्य कुमारः सूतमपृच्छत्।

अथाब्रवीत् राजसुतः स सूतं,
नरैश्चतुर्भिः ह्रियते कः एषः।

दीनैर्मनुष्यैरनुकम्प्यमानो
　　यो भूपतिस्त्वाप्यवकल्पते च ॥ १५ ॥
दुर्भिक्षमारीप्रमुखैर्विमुक्तः
　　सुखो [illegible] विनयान्तकाष्ठभृतः ।
संक्रान्त सम्भूय न यज्ञयद्भिः
　　क्रियाभिरेभिः स्वजनस्य कोऽपि ॥ १६ ॥

इत्थं न नित्यं नियतं प्रजानां
　　ज्ञानानि [illegible] लोकः ।
कर्माणि [illegible] [illegible] नृणां
　　[illegible] [illegible] वर्तमानाः ॥१७॥
तस्मादयं नूनं [illegible] नो
　　निराकृतो न हि देशकालः ।
ज्ञानेन विनाशं [illegible]
　　[illegible] [illegible] हि प्रसङ्गः ॥ १८ ॥

षड्विंशः पाठः

पराजयः

पराजित कोशलनरेन्द्र के सम्मुख विजेता काशी-नरेश को झुकना पड़ता है! यह पद्य प्रबन्ध "हार की जीत" का एक अनुपम और सजीव उदाहरण है। इस कविता की रचना सन् १६२६ ई० में हुई है। यह पाठ श्री अमरेन्द्र मोहन भट्टाचार्य-रचित गीतांजलि से लिया गया है।

न कोशलेशस्य तुला धरायां
तत्कीर्त्तिगाथा जगदश्नुते हि।
स पालयन् दीनजनान् प्रपन्नान्
रक्षन् प्रजानामपरः पितेव ॥ १ ॥

श्रुत्वेति काशीनृपतिःस्वराज्ये
रोषाग्निना तीव्रतरं दिदीपे।
मम प्रजा ये च मसान्नदासा
नमन्ति मत्तोऽधिकगौरवं तम् ॥ २ ॥

धर्मेण वीर्येण गुणैरथान्यै—
र्न मे कलामर्हति यः कथंचित्।
दानेन मां सोऽतिशयीत किन्तु
प्रवंचना कौशलमस्य नूनम् ॥ ३ ॥

आहूय सेनान्यमसावकस्मात
समादिशत् सन्नहनाय तूर्णम्।
आक्रम्यतां कोशलभूमिपालः
स्पर्द्धां तदीयां न सहे कथंचित् ॥ ४ ॥

[illegible] [illegible]—
[illegible] [illegible] कोशलेन्द्रः ।
[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] ॥ ५ ॥

[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] ॥ ६

[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible]

दृष्ट्वा महीपस्य च शासनं तद्
दूतस्य सम्पर्यटतोऽग्रहस्ते।
न्यमीलयन् केचन कम्पमाना
दृशोऽप्यधुः केचन कर्णयुग्मम् ॥ ११ ॥
तं श्रीसनाथं परिहीनराज्यं
वने भ्रमन्तं परिधाय वल्कलम्।
महीपमागत्य कुतोऽपि कश्चित्
पप्रच्छ दीनः पथिपेः कदाचित् ॥ १२ ॥
"जानासि किं भद्रमुख क्व शेषो
वनस्य पन्थाः क्व च कोशलायाः।
निमग्ननौकस्य वणिग्जनस्य
न कौशलेशेन विना गतिः स्यात् ॥ १३ ॥
कदा नु तं दीनजनैकबन्धुं
दृष्ट्वा गमिष्यामि मनोरथान्तम्।
निशम्य तस्येति वचो महीपो
रुरोध वाष्पं स्मयमान एव ॥ १४ ॥
विचिन्त्य किंचिन्मनसा मुहूर्तं
निःश्वस्य दीर्घं नृपतिस्तमूचे।
गच्छाग्रतः पान्थ मनोरथस्ते
सिध्येत् यथैवाशु तथा यतिष्ये ॥ १५
जटां दधानं धृतवल्कलं तं
पान्थं पुरस्कृत्य सभां विशन्तम्।
यथावदभ्यर्च्य स चण्डसेनः
किमर्थमत्रेति हसन्नपृच्छत् ॥ १६ ॥
आघोषितं निष्कशतं यदर्थे
स कोशलेशोऽस्मि वने वसामि।

अस्मै पणं तं कृपया प्रदाय
गृहाण मामित्यवद् प्रशान्तः ॥ १७ ॥
अचिन्तितोपेतमुं समीक्ष्य
सद्यः सभा नीरवतामवाप ।
तदीयवृत्तं स्मरतां जानना—
मदृश्यताक्ष्णोरपि वारिधारा ॥ १८ ॥

तथा ब्रुवाणं तमुवाच काशी—
नराधिपः स्मेरमुखेन "साधो !
अहो महीयस्तव कौशलं यत्
त्यक्त्वापि देहं विजिगीषसे माम् ॥ १९ ॥

जयश्रियाद्य त्वयि माल्यदानं
सहिष्यते नैव मया कथञ्चित् ।
गृहाण दत्तं तव राज्यमेतत्
मनोऽपि तस्यैव च दक्षिणार्थम् ॥ २० ॥

इति ब्रुवन्नेव करे गृहीत्वा
निधाय मौलौ मुकुटं प्रसह्य ।
अध्यासयामास नृपासनं तम्
उत्तस्थुरुच्चैरपि साधुवादाः ॥ २१ ॥

प्रश्नाः

१—अस्मिन् पद्यप्रबन्धे वस्तुतः कः पराजितः ?

२—कोशलेन्द्रः केन सह किमर्थं च काशीनरेशमुपगतः ?

३—द्वितीय चतुर्थं दशम द्वादश चतुर्दश पञ्चदश श्लोकाः व्याख्येयाः ।

४—अधोलिखितेषु पदच्छेदपुरस्सरं सन्धिकार्यं प्रदर्श्यताम् -पितेव, श्रुत्वेति गुणैरथान्यैः, गच्छाग्रतः, तस्यैव, ब्रुवन्नेव ।

सप्तदशः पाठः

स्वार्थी दोषं न पश्यति

अतः सत्कारमवाप्य ऋषिभिः सह कुरुवृद्धेषु गतेषु मातुल-शकुनिना सहैको दुर्योधन एव नृपाज्ञया नृत्यगीतादिविविध-सुखानि अनुभवन् तत्रातिष्ठत्। उक्तञ्च —विभूतयो ज्ञातिभोगे-नैव विभूष्यन्त इति। अथैकदा दुर्योधनो दिव्याभिप्रायरुचिरां, तप्तकांचनजालकां, शशिमणिप्राकारकृतचन्द्रिकां च सभां वीक्ष्यमाणः स्फाटिककुट्टिममवाप्य जलाशंकया वस्त्राणि उत्क्षिप्तवान् परन्नासीत् तत्र जलम्। सोऽथ व्रजन् विमलं सरो विलोक्य स्फाटिकाशंकया तत्र सहांशुकोऽमज्जत्। एवं विप्रलब्धं तं विलोक्य किंकरा, हर्म्यस्था राजललनाः, वृकोदरा-दयः पाण्डवाश्च सर्वेऽहसन्। ततः दुर्योधनस्तेनावमानाग्निना दह्यमानः कथंचित् स्वाकारसंवृत्तिं चक्रे। अथ युधिष्ठिर-मामन्त्र्य गजसाह्वयं च गच्छन् चिन्ताविवर्णवदनो भूतग्रस्त इवाभवत्। एवमालोक्य शकुनिरपृच्छत्। युवराज! कोऽयं तव धृतिविप्लवः? सर्वेश्वरस्य ते किमपि शोककारणं न हि पश्यामीति। तत् श्रुत्वा दीर्घं निःश्वस्य शुष्काधरपल्लवो दुर्यो-धनोऽब्रवीत्। मातुल! आत्मानवञ्चितं वैरिषु च पूर्णां श्रियं दृष्ट्वा मद्विधोजनः कथं जीवति। पाण्डववेश्मनि द्वाःस्थैः रुद्ध-प्रवेशान् भूपालानवलोक्य ग्लानमानस्य मे निधनं महोत्सवः स यज्ञः, सा सभा, सा श्रीः, ते भोगाः, स परिच्छदो मनोरथश्च यदा मातुमपि न शक्यः तदा कुतो मे महोत्सवः। सभायां तमवहासं, शात्रवं विभवं च प्रतीकारं विना अहितसंकल्पो-ऽहं न सेहे। एतदाकर्ण्य शकुनिः प्रोवाच। भागिनेय!

पाण्डवाः स्वभुजवीर्येण विभवशालिनः सञ्जाताः। तैस्तव शक्तिर्न हृता। त्वमपि दिग्विजयी भव। परं कृष्णार्जुनवृकोदरान् देवराजोऽपि जेतुमसमर्थ इत्यहं जाने। निरपायश्चात्र एक एवोपायो विद्यते। सोऽहमक्षज्ञोऽनक्षज्ञं धर्मसुतं जेतुं क्षमः द्यूतेन सर्वां तत् श्रियं जित्वा तुभ्यं दास्यामीति।

शकुनिस्तूर्णं धृतराष्ट्रमुपेत्य प्रणयान्न्यवेदयत्। राजन्! तव सुतो दुर्योधनो विनैव व्याधिं विवर्णवदनो भृशमातुरो वर्त्तत इति। एवमाकर्ण्य प्रज्ञाचक्षुः निर्जने सर्वसंभोगसुभगं सुतमानाय्य दुःखकारणमपृच्छत्। तदा दुर्योधन उवाच। अभेषजेन दुःखेन पीडितोऽस्मि। यो मानी शत्रूणामधिकां लक्ष्मीं तथात्मनो न्यूनां च श्रियं दृष्ट्वापि वनं न याति, सः कैः प्रमाणीक्रियते। भूपाल! युधिष्ठिरस्य रत्नोपायनसंग्रहे क्रतौ राजपूज्येन मयापि कोषाध्यक्षायितम्। दुःखेऽप्यदुखितेनेव मया रिपुगेहे नटवत् सर्वं गृहीतम्। तत् किं मे मरणं नास्ति। तत्र पूर्ववैरिणा यत् सम्मानं कृतं तन्मेऽद्यापि मर्माणि कृन्तति। या युधिष्ठिरश्रीः मया राजसूये विलोकिता नरेश्वरास्तां मनोरथेनापि वोढुं न शक्ताः। तत्र बहवो नराधिपाः प्रवेशमनवाप्य करप्रदा इव चिरं द्वारि व्यलग्वन्त। तस्याभिषेकसमये छत्रव्यजनपाणयो नरेश्वरा अहपूर्विकया तत्र तस्थुः। युधिष्ठिरस्य या श्रीः यज्ञेऽभूत् तां शक्रः कथं प्राप्नोति। तस्य रत्नविचित्रायां सभायां स्फटिकभ्रमेण विप्रलब्धोऽहमपि अनभिज्ञवत्नीरे निपतितः। तत्र सात्तिसकोचं यन्मां वृकोदरोऽहसत् स एव शोकः आयसः शंकुरिव मे हृदि मग्नः। तात! सोऽहं त्वदाज्ञया शकुनिं समुपाश्रितो द्यूतेनैव तां धर्मराजस्य श्रियं हर्त्तुमिच्छामीति।

एवमाकर्ण्य पुत्रवचः स्वकुलक्षयशंकितो धृतराष्ट्रोऽवदत्। वत्स! कोऽयं ते व्यसनागमः। भ्रातुर्वैभवमालोक्य कथं परितप्यसे? तवापि भूपस्पृहणीयाः सम्पदा सन्ति। पुत्र! स्वाधीनभुजविक्रमस्त्वमपि पाण्डवैः सहायैः भूपान्विजित्य बहुभि मखैः यजस्व। लोके छलेन परस्व हृत्वा कः सुखं शेते इति। एवं पुनः पुनः प्रबोधितोऽपि दैवविमोहितो दुर्योधनो यदा द्यूतनिर्बन्धं नात्यजत् तदा सुतवत्सलः कुरुपतिः यथा कथंचित् तथेत्युक्त्वा सभामकारयत्। मनुष्यः सदा भवितव्यतया मुद्रितो भवतीति सत्यमुक्तं मुनिभिः। यत् वृद्धः कुरुपतिरपि कपटसपोपयदिति।

प्रश्नाः

१—"स्वार्थी दोषं न पश्यति" इति विषयमुररीकृत्य संक्षिप्तनिबन्धो लेख्यः।

२—पाण्डवाः कदा किमर्थं चाहसन्?

३—अधोलिखितपदानां वाच्यपरिवर्त्तनं क्रियताम्-दुर्योधनो द्यूतनिर्बन्धं नात्यजत्। वृद्धः कुरुपतिः कपटमपोषयत्। भ्रातुः विभवमालोक्य कथं परितप्यसे।

४—निम्नस्थपदानां समासाः विग्रहवाक्यानि च लेख्यानि—तप्तकांचनजालकाम्, हर्म्यरथाः, रत्नोपायनसंग्रहे, चिन्ताविवर्णवदनः।

(गद्यभारतात्)

अष्टाविंशः पाठः

कृतज्ञतापरीक्षणम्

यह पाठ संस्कृत की "द्वात्रिंशत् पुत्तलिका" (Fairy Tales) से लिया गया है। इस पाठ में राजा विक्रम की ३२ कहानियाँ हैं। इसके रचना-काल और रचयिता के सम्बन्ध में कोई विश्वस्त प्रमाण नहीं मिलता। पर ग्रन्थ की भाषा उत्तम और शैली रोचक है।

महीं शासति महाप्रतापे भूभृति विक्रमादित्ये कश्चन ब्राह्मण सकलशास्त्रनिष्णातः समस्तगुणालंकृतोप्यपुत्रः समभवत्। पुत्राभावविषादेन दूयमानचेताः स रात्रिन्दिवं बहूनुपायान् अन्वतिष्ठत। भगवन्तं महादेवञ्च व्रतादिभिः अतोषयत्। तत एकदा तं भूसुरं स्वप्ने जटा मुकुटधारी वृषभवाहनो भूतभावनो भवानीपतिः प्रत्यक्षीभूय "भूसुर" तुष्टोऽहं तव तपश्चर्यया अचिरादेव तनयमुखावलोकनसुखमधिगच्छसीति उवाच। प्रभाते स्वप्नवृत्तान्तं विद्वद्भ्यो न्यवेदयत् विप्रः सः। तैरपि "विप्र! सद्य एव पुत्रं लप्स्यसे, न हीदृशाः स्वप्नाः वितथा भवन्तीति समाश्वासितः परमां मुदमवाप। अथ केनचित् कालेन तद्भार्या उद्भासमानैः सहजभूषणैरिव महापुरुषलक्षणैः समेतं विनयावनतं कुलदीपकं कुमारमसूत।

प्रहृष्टेनान्तरात्मना जनकः पुत्रस्य शुभे मुहूर्त्ते देवदत्त इति नाम चकार। अनन्तरमन्नप्राशनादि उपनयनान्तानि कर्माणि कृत्वा सद्गुरुभ्य सर्वाः विद्याः, सकलाश्च कलाः अशिक्षयत। सोऽल्पकालेनैव कुशाग्रधीतया सर्ववाङ्मयं

जग्राह। सर्वलक्षणान्वितया सुरूपया कयाचिद् बालिकया तस्योद्वाहं सम्पाद्य तीर्थयात्रां जिगमिषुः विप्रः सुतमुपदिदेश। पुत्र! अतिकष्टां दशां प्रपन्नोऽपि स्वधर्माचारं मा परिहर, परैः सह मा विधेहि विवादं, दयस्व सर्वभूतानाम्। अनुसर तत्त्वज्ञान्, ब्रूहि प्रस्तावसदृशम्, परिहर दुर्जनान् इति। एवमुपदिश्य वाराणसीमगमत् तस्य जनकः। देवदत्तश्च पितुरुपदेशं परिपालयन् तत्रैव नगरेऽवसत्।

एकदा होमसमिदाहरणार्थं महारण्यं प्रविष्टो यावत् समिधः छिनत्ति तावत विक्रमार्को राजा मृगयार्थं वनं गतः, शूकरमनुधावन् काननं प्रविष्टः पुरो मार्गमजानन् देवदत्तं प्रेक्ष्य नगरमार्गमपृच्छत्। सोऽपि राजानं नीत्वा नगरं प्रापयत्। तदुपकारसन्तुष्टो नृपः कस्मिंश्चिद् व्यापारे तं न्ययोजयत्। सर्वदा सर्वजनसमक्षं सदसि च तं प्राशंसत्। एकदा देवदत्तो मनसि व्यचिन्तयत् क्षुद्रेऽपि ममोपकारे एष मां प्रशंसति। अहो, सौजन्यमस्य। अथवा महतामेष स्वभाव एव—

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेलाःफलानाम्।
उदकममृतकल्पं दद्युराजीवनान्तं
नहि कृतमुपकारं साधवो विस्मरन्ति॥ १॥

किं वा परीक्षेय यदस्य मयि प्रीतिः वास्तविकी केवलं दर्शनार्थैव वा। इति विचिन्त्य राजकुमारं केनाप्यविदितं स्व मन्दिरे संगोप्य तस्यालंकारं भृत्यहस्ते दत्वा नगरे विक्रयार्थं प्रेषयामास। इतो राजमन्दिरे "राजपुत्रं कोऽपि तस्करोऽपाहरदिति कोलाहलः समजनि।" नृपतिः स्वसुतपरिमार्गणाय

राजपुरुषान् प्राहिणोत्। ते विपणिमध्ये राजकुमाराभरणहस्तं देवदत्तभृत्यं विलोक्य बद्ध्वा राजसकाशमानयन्। कुतो लब्ध-मिदमाभरणमिति नृपेण पृष्टः किंकरः—देवदत्तभृत्योऽहं तेनै-वाभरणमिदं मह्यं समर्प्य, इदम् विक्रीय धनमानयेति विपणौ प्रेषित इत्युवाच। अनन्तरं भूभृद् देवदत्तमाजुहावापृच्छच्च "कुत एतादभरणं लब्धमिति ?" धनलोलुपोऽहमेव कुमारं हत्वा सर्वाणि तदीयाभरणानि अग्रहीषम्। तेषु अन्यतमम-मुमलङ्कारं विक्रेतुं निजभृत्यं विपणिं प्रैषयम्। प्राक्तनकर्मव-शात् ईदृशी मे कुमतिरभवत् इति प्रत्यब्रवीत् देवदत्तो राजानम्।

इदमाकर्ण्य केचिद् सभासदः-बालघाती स्वर्णस्तेयी च अतः खादिरेण शूलेन हन्तव्य इति प्रोचुः। अपरे पुनः-अमुं तिलशः छित्वास्य मांसासृग्भिः गृध्रेभ्यो बलिर्दातव्य इति प्रोचुः। पार्थिवः सर्वेषां वचनमाकर्ण्य परमं धैर्यं प्रकाशयन्न-ब्रवीत्-भोः सभ्याः! अयं ममाश्रित उपकारकश्च अतो नाह-मेनं निहन्मि। न हि साधुभिराश्रितानामुपकर्त्तॄणाञ्च गुण-दोषचिन्ता विधेया। उक्तं हि—

चन्द्रः क्षयी प्रकृतिवक्रतनुर्जडात्मा
दोषाकरो भवति मित्रविपत्तिकाले।
मूर्ध्ना तथापि विधृतः परमेश्वरेण
नैवाश्रितेषु महतां गुणदोषचिन्ता ॥ २ ॥

इत्युक्त्वा देवदत्तमवदत् देवदत्त! मा बिभीहि। मम पुत्र-निधने त्वं हेतुरपि तु बलीयांसि प्राक्तनानि कर्माण्येव कारणम्। किं च महारण्ये पथभ्रच्युतं मां नगरं नीतवतो महोपकारि-

णस्ते प्रत्युपकारसहस्रैरपि अहमुत्तीर्णो न भवामीति।" वस्त्राभरणादिना तं संभाव्य विससर्ज।

ततो देवदत्तः कुमारमानीय राज्ञे समर्पयत। साश्चर्येण राज्ञा 'किमेतदिति' पृष्टः सर्वं वृत्तान्तं न्यवेदयत्। राजा तुष्टः प्रथमतोऽपि प्रभूततरं संभाव्य तमुच्चपदे निवेशयामास।

प्रश्न

१—पिता पुत्रं किमुपदिश्य वाराणसीमगमत्?

२—'कृतज्ञतापरीक्षणम्' इति विषयमुररीकृत्य कश्चिदन्यः संक्षिप्तनिबन्धो लेख्यः।

३—निम्नलिखितपदानां मूलशब्दान् विलिख्य रूपाणि लिखत—
भूभृति, भगवन्तम्, विद्वद्भ्यः, अनुधावन्, मूर्धा।

५—चन्द्रः क्षयी.... ....अस्य श्लोकस्यार्थं लिखत।

नवविंशः पाठः

महाप्रस्थानम्

महाभारत का युद्ध समाप्त होता है। धर्मराज युधिष्ठिर सिंहासन पर बैठते हैं। सगे-संबन्धियों के युद्ध में काम आ जाने और भगवान् कृष्ण के इह लोक-त्याग से धर्मराज का मन राज कार्य में नहीं लगता है। वे द्रौपदी और चारों भाइयों के साथ-हिमालय की ओर प्रस्थान करते हैं। देवराज इन्द्र उनकी परीक्षा लेता है। उसमें वे खरे उतरते हैं और सदेह स्वर्ग जाते है। यह पाठ सम्पादक ने लिखा है।

श्रावं श्रावं भृशममोदथा अन्यभागानपि भक्षयितुमयतथास्तेन क्षितौ पतितोऽसीति।

ततः समुपस्थितः सुरेन्द्रो धर्मराजमवोचत्—"राजन्! उपविशास्मिन् रथे त्वां स्वर्गं नेतुं समागतोऽहम्।" धर्मराजेनोक्तम्—देवराज! सत्यव्रतां भार्यामाज्ञापराननुजांश्च विहाय स्वर्गलोके न जिगमिषामीति।" इन्द्र उवाच—नृपते! मानवदेहमुन्मुच्य ते तत्र सम्प्राप्ताः। अधुना त्वया शरीरेण गन्तव्यमिति। विस्मितो युधिष्ठिरस्तद् वचनं श्रुत्वाब्रवीत्—अहमेतं सारमेयं नयामीति। विहस्य मघवा प्राह—स्वसम्बन्धिनो विहाय क्षुद्रजीवमेनं कथं बहु मन्यसे? युधिष्ठिरेण कथितम्—अनुजादयो मया न विसृष्टाः परं त्यक्तपञ्चभौतिकगात्रास्ते मत्तः पृथग्भूता न ममाधीनमेतत्। वनेवासं कुर्वद्भिरस्माभिः सह एष सारमेयोऽप्यवसत्। कथमेनं त्यजेयं, भक्तत्यागान्महन्नास्ति किंचिद् पातकम्। युधिष्ठिरस्य युक्तियुक्तमेतद् वचो निशम्य प्रफुल्लितवदनः सुरेशः कुक्कुरेण सार्धं धर्मराज रथमारोहयत् तौ च स्वर्गमनयत्।

प्रश्नाः

१—भीमयुधिष्ठिरयोः प्रश्नोत्तराणि वर्णयत।

२—सुरेशधर्मराजसंलापं पञ्चभिर्वाक्यैः स्वभाषायां लिखत।

३—वाक्यपरिवर्त्तनं क्रियताम्—अहं सारमेयं नयामि। तैरश्वमेधयज्ञोऽपि विहितः। कथमेनं त्यजेयम्।

४—अर्था लेख्याः—संहारलब्धम्, वृष्णिकदनम्, द्रौपदीग्लानिः। जिगमिषामि।

त्रिंशः पाठः

भर्तृहरेः पद्यानि

दो हजार वर्ष पूर्व विद्वान्, नीतिकुशल, महाराज भर्तृहरि उज्जैन में राज्य करते थे। वे एक योग्य वैयाकरण, वेदान्ती और कवि थे। नीति शृंगार और वैराग्य शतकों से विभूषित उनका प्रसिद्ध काव्य "भर्तृहरि शतक" है। इसको पढ़कर पाठकों के हृदय में उदात्तभाव जागृत हो जाते हैं। नीति, शृंगार और वैराग्य का ऐसा अनुपम, विशद और अनुभवजन्य विवेचन अन्यत्र दुष्प्राप्य है। भाषा सरस और शैली प्रभावोत्पादक है।

नीतिशतके

साहित्यसंगीतकलाविहीनः,
साक्षात् पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानः,
तद् भागधेयं परमं पशूनाम्॥ १॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः,
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः,
प्रारभ्य चोत्तमजनाः न परित्यजन्ति॥२॥

दिनस्य पूर्वार्द्धपरार्धभिन्ना,
छायेव मैत्री खलसज्जनानाम् ॥ ४ ॥
यः प्रीणयेत् सुचरितैः पितरं स पुत्रो,
यद् भर्त्तु रेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं यत्,
एतत् त्रयं जगति पुण्यकृतो लभन्ते ॥ ५ ॥
रत्नैः महार्हैः तुतुषु- र्न देवा,
न भेजिरे भीमविशेषेणभीतिम्।
सुधां विना न प्रययुः विरामं,
न निश्चितार्थाद् विरमन्तिधीराः ॥ ६ ॥
दौर्मन्त्र्यान्नृपतिः विनश्यति यतिः
संगात् सुतो लालनात्।
विप्रोऽनध्ययनात् कुलं कुतनयात्,
शीलं खलोपासनात्।
ह्रीः मद्यादनवेक्षणादपि कृषिः,
स्नेहः प्रवासाश्रयात्।
मैत्री चाप्रणयात् समृद्धिरनयात्,
त्यागात् प्रमादाद्धनम् ॥ ७ ॥

वैराग्यशतके

निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः
समानाः स्वर्याताः सपदिपि सुहृदो जीवितसमाः।
शनैः यष्ट्यु त्थानं घनतिमिररुद्धेऽपि नयने,
अहो धृष्टः कायस्तदपि मरणापायचकितः ॥ ८ ॥
भोगे रोगभयं कुले च्युतिभयं, वित्ते नृपालात् भयं,
मौने दैन्यभयं बले रिपुभयं, रूपे जराया भयम्।

शास्त्रे वादभयं गुणे खलभयं काये कृतान्तात् भयं,
सर्वं वस्तु भयान्वितं, भगवतः शम्भोः पदं निर्भयम् ॥ ९ ॥
वलिभिः मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ १० ॥
अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृशदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित् पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥ ११ ॥

प्रश्नाः

१—को मानवः साक्षात् पशुः ?

२—खलसज्जनाना मैत्रीं वर्णयत ?

३—शम्भोः पदं कथं निर्भयम् ?

४—समासनामपुरस्सरं विग्रहःकार्यः—साहित्यसंगीतकलाविहीनः । घनतिमिररुद्धे । मरणापायचकितः ।

५—"ननिश्चितार्थात् विरमन्ति धीरा" इति विषयं स्वीकृत्य सं निबन्धो लेख्यः ।

एकत्रिंशः पाठः

रामायणमहाभारतसुभाषितानि

रामायण और महाभारत की निम्नलिखित सूक्तियां जीवन-संग्राम में सफलता प्राप्त करने के लिए अमोघ अस्त्रवत् हैं।

रामायणसुभाषितानि

आढ्यो वापि दरिद्रो वा दुःखितः सुखितोऽपि वा।
निर्दोषश्च सदोषश्च वयस्यः परमा गतिः ॥ १ ॥
उत्साहो बलवानार्य नास्त्युत्सहात् परं बलम्।
सोत्साहस्य हि लोकेषु न किंचिदपि दुर्लभम् ॥ २ ॥
निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः।
सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति ॥ ३ ॥
गुणवान् वा परजनः स्वजनो निर्गुणोऽपि वा।
निर्गुणः स्वजनः श्रेयान् यः परः पर एव सः ॥ ४ ॥
ज्येष्ठो भ्राता पिता वापि यश्च विद्यां प्रयच्छति।
त्रयस्ते पितरो ज्ञेया धर्मे च पथि वर्त्तिनः ॥ ५ ॥
शोको नाशयते धैर्यं शोको नाशयते श्रुतम्।
शोको नाशयते सर्वं नास्ति शोकसमो रिपुः ॥ ६ ॥
न विषादे मनः कार्यं विषादो दोषवत्तरः।
विषादो हन्ति पुरुषं बालं क्रुद्ध इवोरगः ॥ ७ ॥
यो विषादं प्रसहते विक्रमे समुपस्थिते।
तेजसा तस्य हीनस्य पुरुषार्थो न सिध्यति ॥ ८ ॥
अविज्ञाय फलं यो हि कर्म त्वेवानुधावति।
स शोचेत् फलवेलायां यथा किंशुकसेवकः ॥ ९ ॥

त्रयस्त्रिंशः पाठः

समर्थगुरुः श्रीरामदासः

संसारसर्पभीतश्च नारायणो विवाहमण्डपात् तथा पलायितो यथा तं गृहीतुं केऽपि नाशक्नुवन्। स तु प्रथमतः स्वनिवासस्थानमागत्यातिविशालवटवृक्षस्य कोटरे आदिनत्रयमुवास। अत्रावस्थानं पुनरपि मातृप्रेमपाशबन्धनकारणमिति मत्वा स नासिकक्षेत्रं जगाम। तत्र च जगद्वन्द्यरामचन्द्रचरणारविन्दपरिपूते, अतिनिर्मलगोदावरीप्रवाहसालङ्कृते, निखिलजनजननीजनकतनयाकोमलपदकमललाञ्छिते, परिदृश्यमानमृगबालकक्रीडामनोहरे पंचवटीक्षेत्रे तपः तप्तुमारभत। यद्यपि सन्ति नानाविधानि तपांसि तथापि ब्राह्मणस्य गायत्र्येव मुख्या इति मत्वा स प्रथमतो गायत्रीपुरश्चरणमेव कर्तुमारेभे। समारब्धे तपोऽग्रेसरे गायत्रीपुरश्चरणे नारायणः केवलं मध्याह्नकाले गृहस्थगेहानि गत्वा माधुकरीं वृत्तिमवलम्ब्य लब्धमन्नं रामदेवाय निवेद्याभक्षयत्, पुनश्च तप एवारभत। इदानीन्तु तस्य वयो द्वाविंशतिवर्षाणि असीन्, सर्वे च तत्रत्या जनाः केवलं द्वाविंशतिवार्षिकीं तस्य बालतपस्विनो दिव्यकान्तिजुषं मूर्तिमवेक्ष्य व्यस्मयन्त। केचन भावुका जनाः तं वैराग्यावतारमेवामन्यन्त। एवं रात्रिन्दिवं तपस्यतो नारायणस्य भूयान् कालः समतीतः।

एकदा भगवच्चरणारविन्दध्यानपरे नारायणे वृक्षस्याधस्तात् बद्धपद्मासने तिष्ठति सति काचन षोडषवर्षदेशीया सौभाग्यवती मृतं पतिमनुगन्तुकामा तेनैव पथा समाजगाम। तस्याश्च भर्ता तरुणो धनधान्यसम्पन्नो देशमुख्यपदासीनः,

परन्तु स क्षयरोगेण पंचत्वमगात् । तं च देशमुखं दग्धुं बहवो जनाः समागच्छन् । सतो सौभाग्यद्रव्यालंकृतभाल-प्रदेशा तपस्विनं समाधौ मग्नं नारायणं समालोक्य सजातश्रद्धा शीघ्रमेव समीपमागत्य ववन्दे । नारायणस्तु पिहितनयनकमलः कंकणध्वनिमाकर्ण्य अनुमितसौभाग्यवत्यागमनः सहसा "अष्ट-पुत्रा सौभाग्यवती भव" इत्याशिषं विततार । सा साध्वी तामाशिषं श्रुत्वा स्मेरमुखी "स्वामिन्, अहमस्मि गतप्राणं पतिमनुगन्तुकामा । ततश्च इयमाशीः अस्मिन् जन्मनि फलदा वा परस्मिन्" इति पप्रच्छ ।

नारायणश्च तस्या इदं वचनं निशम्य विस्मितो मनस्येव श्रीरामदेवं संप्रार्थ्य कमण्डलुस्थं तीर्थं तस्य मृतस्य गात्रे चिक्षेप । पतिते एव तस्मिन तीर्थोदके स मृतः सुप्तवत् राम रामेति वदन् उदतिष्ठन् । अवदच्च "एषैव मूर्त्तिः यमलोकमा-गत्य यमं मन्मोचनाय समाज्ञाप्य मां गृहीत्वा प्रत्यागता इति ।" सा च पतिव्रता नारायणस्य चरणकमले शिरसि निधाय सानन्दा नानाविधां भक्तिमकरोत । तत्र मिलिता जना इदमाश्चर्यं वीक्ष्य विस्मिताः—अहो ! तपसः सामर्थ्यम् । धन्योऽयं देशः । यत्र च एतादृशोऽलौकिकतपःसामर्थ्यशालिनः तपस्विनोऽद्यापि निवसन्ति इत्यवदत् । केचन "समर्था भगवद्भक्ताः किं किं न कुर्वन्ति" इति प्रालपन् । तद्दिनादारभ्य सर्वेऽपि तत्रस्था जना नारायणं तन्नाम्ना अव्यपदिशन्तः समर्थनाम्नैव व्यपादिशन् ।

प्रश्नाः

१—नारायणो विवाहमंडपात् किमर्थं पलायितः ?

२—जना नारायणं समर्थनाम्ना कदा व्यपादिशन् ।

३—अस्याः कथाया भावः पंचभिः वाक्यैः स्व भाषायां लिखत ।

४—निम्नस्थपदानां समासनामपूर्वकं विग्रहः कार्यः—

अतिनिर्मलगोदावरीप्रवाहसालंकृते, निखिलजनजननीजनकतनया कोमलपदलांछिते, भगवच्चरणारविन्दध्यानरते ।

५—रूपाणि लिखित—

अशक्नुवन्, उवास, आरभत, ववन्दे वितितार पप्रच्छ ।

(श्रीरामदासस्वामिचरितात्)

चतुस्त्रिंशः पाठः

सरस्वतीप्रशस्तिः

सर्वात्मिके ! सर्वमनोऽभिरामे !
वीणाधरे ! बुद्धिविकासशीले !
आनन्दसंचारपरे ! मदीये
चित्तेऽपि किञ्चित् कुरु संनिवासम् ॥१॥

मदीयवाचापि मनः सुखाय
गेयं ततः किंचन गीतमेकम् ।
भवेत् कृतार्थो मम शब्दराशिः
कश्चिन्नवोऽर्थश्च विभातु लोके ॥२॥

यदा अम्बा स्वविचारलीना
तन्त्रीं स्वनो नादयसीह मातः !
तथास्थिताः के न तदा भवन्ति,
श्रुत्वा तद्गीतमहोऽद्वितीयम् ॥३॥

किं श्रावितं मधुरगीतमहो कदाचित्,
श्रीकालिदासभवभूतिसुबन्धुमुख्यैः ।
यस्मात् स्वयं गातुमहोप्रवृत्ता,
याऽद्यापि गीतिलहरी मधुरा तथैव ॥४॥
निर्गायकेष्वपि तु किंचन किन्तु गेयं,
सर्वेऽपि गाननिपुणा न भवन्ति लोके ।
शुष्केऽपि कीचकचये पवनप्रवेशः,
किं न स्वयं सृजति गीतमहो सुरम्यम् ॥५॥
स्रोतावहा भवति सैव सदेहरम्या,
यस्याः प्रवाहसरणिः स्वत एव सिद्धा ।
संखन्य भूतलमिदं प्रतिलीयमाना,
कुल्या स्वतन्त्रसरणिं लभते न काचित् ॥६॥

प्रश्नाः

१—शुष्के कीचकचये पवनप्रवेशः किं सृजति ?
२—निम्नस्थपदानां विग्रहपुरस्सरं समासा लेख्याः—
बुद्धिविकासशीले, स्वविचारलीना, सदेहरम्या, स्वतन्त्रसरणिम् ।
३—निम्नलिखितक्रियापदानां रूपाणि लेख्यानि—
कुरु, विमातु, सृजति, लभते ।

(अभिनवकवे विद्याधर शास्त्रिणः)

पंचत्रिंशः पाठः

तापसानुकम्पा

दाक्षिणात्य महाकवि दिङ्नाग का समय ईसा की पाँचवी शताब्दी का उत्तरार्ध या छठी का पूर्वार्ध माना जाता है। ये वर्ण से ब्राह्मण और श्री वसुबन्धु के शिष्य थे। वे उच्च कोटि के नैयायिक तथा शास्त्रार्थ करने में धुरन्धर विद्वान् होते हुए भी एक सफल नाटककार हो गये हैं। इनके बनाये हुए न्याय प्रवेश, प्रमाणसमुच्चय आदि न्याय के कई ग्रन्थों का श्री परमार्थ ने सन् ४५७-५६७ में चीनी भाषा में अनुवाद किया। प्रस्तुत पाठ इनके "कुन्दमाला" नाटक से लिया गया है।

(ततः प्रविशति वल्मीकिः)

वाल्मीकिः—(ससम्भ्रमम्)

आकर्ण्य जह्नुतनयां समुपागतेभ्यः,
सन्ध्याभिषेकसमये मुनिदारकेभ्य
एकाकिनीमशरणां रुदतीमरण्ये,
गर्भातुरां स्त्रियमतित्वरमागतोऽस्मि ॥१॥

(अन्वेषं नाटयति)

सीता—क एष मां वीक्षते। न कोऽपि, भगवती भागीरथी तरंगै माम् अनुगृह्णाति।

वाल्मीकिः—अलम् अन्धकारसंरुद्धतया दृष्टिसंचारस्य न दृश्यते अतः शब्दापयिष्ये। अयमहं भोः।

सीता—(सहर्षम्) वत्स लक्ष्मण! प्रतिनिवृत्तोऽसि ?

वा०—नाहं लक्ष्मणः।

सी०—(अवगुण्ठं नाटयति) अत्याहितं! अन्यं एष को वा महापुरुषः। कथमिदानीं वारयिष्यामि महाहितम्। (विचिन्त्य एवम्-स्त्री अहमेकाकिनी च।

वा०—एष स्थितोऽस्मि। वत्से, तवापि अलं परपुरुषशंकया, दिवसावसानाभिषेकाय भागीरथीं समुपास्य प्रतिनिवृत्तेभ्यो मुनिदारकेभ्यः तव वृत्तान्तमुपलभ्य तपोधनोऽहं त्वामेव अभ्युपसत्तुम् उपागतः। पृच्छामि चात्र भवतीम्—

धर्मेण जितसंग्रामे रामे शसति मेदिनीम्।
कथ्यतां कथ्यतां वत्से विपदेषा कुतस्तव ॥ २ ॥

सी०—तत एव पूर्णचन्द्रात् मेऽशनिपातः।

वा०—काम रामात् एव हि विपत्ति मुपागता।

सी०—अथ किम्

वा०—यदि त्व वर्णाश्रमव्यवस्थाभूतेन महाराजेन निर्वासितासि तत् स्वस्ति भवत्यै, गच्छाम्यहम्।(परिक्रामति)

सी०—अथ विज्ञापयामि

वा०—कथय

सीता०—यदि रघुवरेण निर्वासित इति भवता नानुकम्पनीया, एषा पुनर्गर्भगता रघुसगरदिलीपदशरथ प्रभृतीनां तादृशानां सन्ततिः इदानीं प्रतिपालनीया।

वा०—(प्रतिनिवृत्य) कथम् इक्ष्वाकुवंशमुदाहरति, तत् अनुयोक्ष्ये। वत्से, किञ्च दशरथस्य वधूः?

सी०—यद् भवान् आज्ञापयाति।

वा०—किञ्च विदेहाधिपतेः जनकस्य दुहिता?

सी०—अथ किम्।

वा०—किञ्च सीता!

सी०—नहि सीता, भगवन्, मन्दभागिनी।

वा०—हा हतोऽस्मि मन्दभाग्यः। किं कुतोऽयमत्र भवत्याः प्रासादतलात् अधोऽवतारः?

सी०—(लज्जां नाटयति)

वा०—कथं लज्जते। भवतु, योगचक्षुषा अहम् अवलोकयामि। (ध्यानमभिनीय) वत्से, जनापवादभीरुणा रामेण केवलं परित्यक्ता, नतु हृदयेन। निरपराधा त्वम् अस्माभिः अपरित्याज्या एव। एहि, आश्रमपदं गच्छावः।

सी०—को नु त्वम्?

वा०—श्रूयताम्—

सोऽहं चिरन्तनसखा जनकस्य राज्ञः
तातस्य ते दशरथस्य च बालमित्रम्।
वाल्मीकिरस्मि विसृजान्यजनाभिशंकाम
नान्यस्तवायमबले श्वशुरः पिता च ॥१॥

सी०—भगवन्, वन्दे

वा०—वीरप्रसवा भव भर्तुश्च पुनर्दर्शनं प्राप्नुहि।

सी०—त्वं लोकस्य वाल्मीकिः, मम पुनस्तात एव, तत् गच्छ त्वमाश्रमपदम्। (गंगामवलोक्याञ्जलिं बद्ध्वा) भगवति भागीरथि! यद्यहं सुखेन गर्भमभिनिवर्तयामि तदा नव दिने सुष्ठु ग्रथितया कुन्दमालया उपहारं करिष्यामि।

वा०—अत्यन्तदुःखसंचारोऽयं मार्गः, विशेषतस्त्वां प्रति, वत्
यथा यथा मार्गम् आदेशयामि तथा तथा समाग-
न्तव्यम्।

एतस्मिन् कुशकण्टके लघुतरं पादौ निधत्स्वाग्रतः
शाखेयं विनता नमस्व शनकै र्गर्तो महान् वामतः।
हस्तेनामृश तेन दक्षिणगतं स्थाणुं समं साम्प्रतं
पुण्येऽस्मिन् कमलाकरे चरणयोर्निर्वर्त्यतां क्षालनम् ॥ ४ ॥

सी०—(यथोक्तं परिक्रामति)

वा०—(निर्दिश्य)

इक्ष्वाकूणाञ्च सर्वेषां क्रियाः पुंसवनादयः।
अस्माभिरेव पक्ष्यन्ते मा शुचो गर्भमात्मनः ॥ ५ ॥
कौसल्यापादशुश्रूषासौख्यं वृद्धासु लप्स्यसे।
पश्य सख्यो भगिन्यश्च तवैता मुनिकन्यकाः ॥ ६ ॥

(इति निष्क्रान्ताः सर्वे)

प्रश्नाः

१—सौमित्रिः सीतां किमर्थं वने तत्याजय ?

२—अपि जानकीं परित्यजता रामेण समुचितं कृतम् ?

३—समासनामपुरस्सरं विग्रहो विधेयः—अन्धकारसंरुद्धतया, तपोवन-,
वर्णाश्रमव्यवस्थाभूतेन, जनापवादभीरुणा, अत्यन्तदुःखसंसारः।

४—सीतावाल्मीकिसंवादं देववाण्या लिखत।

षट्त्रिंशः पाठः

लोकोक्तयः

(१) शठे शाठ्यं समाचरेत्। (२) उद्यमे सिद्धिः प्रतिवसति। (३) संघे शक्तिः कलौ युगे। (४) अति सर्वत्र वर्जयेत्। (५) भिन्नरुचिर्हि लोकः। (६) हितं मनोहारि च दुर्लभं वचः। (७) सर्वः स्वार्थं समीहते। (८) श्रेयसि केन तृप्यते। (९) चौराणामनृतं बलम्। (१०) आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्। (११) छिद्रेष्वनर्था बहुलीभवन्ति। (१२) कृशे कस्यास्ति सौहृदम्। (१३) सत्यमेव विजयते नानृतम्। (१४) बुभुक्षितः किं न करोति पापम्। (१५) विषस्य विषमौषधम्। (१६) यावत् नैलं तावत् व्याख्यानम्। (१७) विनाशकाले विपरीतबुद्धिः। (१८) कृतघ्ने नास्ति निष्कृतिः। (१९) स्वार्थी दोषं न पश्यति। (२०) पराधीनः स्वप्नेऽपि सुखं नैति। (२१) निरस्तपादपे देशे एरण्डोऽपि द्रुमायते। (२२) पर्वतखनने मूषिकलाभः। (२३) दैवोऽपि दुर्बलघातकः! (२४) गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः। (२५) महीयांसः प्रकृत्या मितभाषिणः। (२६) उदारचरितानान्तु वसुधैव कुटुम्बकम्। (२७) विद्वान् सर्वत्र पूज्यते। (२८) जातिधर्मः मृदुस्त्यजः। (२९) परोपकाराय सतां विभूतयः (३०) वृद्धा वेश्या तपस्विनी! (३१) जननीजन्मभूमिश्च स्वर्गादपि गरीयसी। (३२) सर्वे गुणाः कांचनमाश्रयन्ते।

प्रश्नाः

१—[illegible] चतुर्णां लोकोक्तीनां भावं वर्णयत।

२—निम्नलिखितानां शब्दानाम् अर्थं विलिख्य वाक्येषु प्रयोगः कार्यः—मनीषी, निष्कृतिः, मृदुस्त्यजः, महीयांसः।

३—सन्धिविच्छेदः कार्यः—छिद्रेष्वनर्थाः, भूमिश्च, स्वर्गादपि, नेति।

सप्तत्रिंशः पाठः

राजस्थानम्

यत्र च भव्यभारते राजते व्याप्तदिग्दिगन्तकीर्त्तिः, वीरप्रसूतिः, परमपराक्रमचमत्कृतकृतसमस्तसंसृतिः प्रतिपदं तत्तत्समरनिहतमहाभटस्मृतिस्तम्भसम्पादितसमलंकृतिः, प्रातः स्मरणीयपद्मावतीप्रभृतिमहनीयनारिरत्नसम्मानिताद्भुतसंस्कृतिः, परमपावनो नानासुकविगीयमानसद्धर्मभावनो, भाजनं सर्वगुणानाम्, आयतनं सर्व वैभवानाम्, श्रियः तीर्थराजपुष्करस्य, संरक्षको गवाम्, भक्षको दुराचारिणाम्, आवासस्थलं च स्वदेशसम्मानसंरक्षणतुच्छीकृतसर्वकृच्छ्राणाम्, धर्माय समर्पितसर्वस्वानां श्रीप्रतापकर्णदुर्गप्रभृतीनां महामानवानां विश्वविख्यातो राजस्थानमिति महान् देशविशेषः ।

निःसलिला परुषा चापि यन्मही च स्वस्वामिकुलाङ्कुरसंवर्धनाय मौनमनश्रुपातं निजं स्तनंधयमपि दस्युदावानलायार्पयन्तीभिः अन्तर्दग्धाभिरपि नित्यहरितादिभिः पर्णादिभिः प्रपर्णिता, ताभिस्ताभिरन्यमान्यमहिलाभिः संग्रमामगमनोत्सुकनिजभर्त्तृहृदयसंशयनिवारणपराभिः, अभिज्ञानार्पितस्वशिरःशोणितसिंचिता, तत्तन्मानवमनः साहसोत्साहसञ्चारणैश्च सुफलिता विहसति सततमन्याः सुजलाः, सफलाश्चाखिलमरुस्थलवसुन्धराः । यत्रत्या नारी—

वान्ध्यं श्रेष्ठं जगति मनुते सा न सूते सुतं चेत् ।
धीरं वीरं रिपुदलशिरः कन्दुकासक्तचित्तम् ।

धिक् स्वस्त्रीत्वं गणयति तया सा न चेद् वीरपत्नी,
युद्धे यातुं प्रियजनशिरःकुंकुमै नार्चयेद् वा ॥१॥
वीरक्षेत्रे प्रवहति सरित् यत्र चैकेव नित्यम्,
संग्रामोर्वीतरलितगतिः रक्तधारा विशाला ।
भीष्मग्रीष्मक्लमविरतये साधनं यत्र चैकम् ।
तेषां पार्श्वे लसति सततं श्यामलश्चन्द्रहासः ॥२॥

प्रश्नाः

१—राजस्थानवीराणां पूतचरितानि संक्षेपेण वर्णयत ।
२—निम्नस्थपदानां विग्रहवाक्यसहितानि समासनामानि लिखत-व्यासदिग्दिगन्तकीर्तिः, नानालुकविगीयमानसद्धर्मभावनः स्वदेशसम्मानसंरक्षणतुच्छीकृतसर्वकृच्छ्राणाम्, प्रियजनशिरः ।
३—निम्नस्थक्रियापदानां अनद्यतनभूतकाले रूपाणि लेख्यानि—निहन्ति, ब्रूते, अर्चयेत, प्रवहति ।
४—अस्मात् पाठात् बहुव्रीहिसमासोदाहरणानि उद्धृत्य लिख्यन्ताम् ।

(अभिनवकवे विद्याधर शास्त्रिणः)

अष्टात्रिंशः पाठः

स्पर्शमणिः

त्याग के अलौकिक महत्त्व को जानकर एक धनार्थी ब्राह्मण स्पर्शमणि को किस प्रकार ठुकरा देता है, निम्नलिखित पद्य-प्रबन्ध में इसका विशद वर्णन किया गया है। इस कविता की रचना सन् १९१६ ई० हुई है।

साधुः सनातन इति प्रथितः पृथिव्यां,
वृन्दावने चिरमुवास तपस्यमानः।
ध्यानैकतानमनसं तमुपेत्य दीन—
वेशो द्विजश्चरणयोरनमत् कदाचित ॥ १ ॥

स्निग्धेक्षणेन तमवेक्ष्य स साधुरूचे,
"त्वं कोऽसि भूसुर कुतः किमिहागतोऽसि ?"
नष्टाध्वखेद इव तन्मधुरस्वरेण,
तं प्रत्यभाषत शनैरवनीसुरोऽपि ॥ २ ॥

स्थानान्यनेकगिरिकानन-संकुलानि,
दूरादतीत्य तव पादमुपागतोऽस्मि।
मां वर्द्धमाननगरान्तिकवासभूमिं,
जानीहि "जीवन" इति हतभागधेयम् ॥३॥

विद्वत्कुले यजन—दान—तपः पवित्रे,
जातोऽस्मि सम्प्रति तु भाग्यविपर्ययेण।
कीर्त्या सहास्तमगमत् सकलं ततश्च,
जीवन्मृतस्य मम नास्ति भुवि द्वितीयः ॥४॥

दैन्येन तेन वनमेत्य सुदुश्चरेण,
स्वाराधितः पशुपतिस्तपसादरेण।
रूपं निजं स परिगृह्य निशावसाने,
स्वप्नेऽथ मामुपदिदेश भवो भयाय ॥५॥

वृन्दावनेषु यमुनातटिनीतटान्ते,
साधुं सनातनमुपेहि तपस्यमानम्।
सेवस्व तत्-पद-युगं स हि ते प्रसन्नः,
सम्पूरयिष्यति मनोरथमाशु वत्स ॥६॥

श्रुत्वा वचोऽद्भुतमिदं मनसाकुलेन,
सोऽचिन्तयत् "किमिव नाम धनं ममास्ति।
आसीद् गृहे यदपि किञ्चन दानयोग्यं,
त्यक्त्वागतस्तदखिलं त्विह भैक्ष्यसारः ॥७॥

दैन्यस्य विस्मृतिरगात् सहसा ततश्च,
साधुः प्रफुल्लवदनो मनसा बभाषे।
सत्यं स्मरामि पुलिने भ्रमता कदाचित्,
स्पर्शादिनाम मणिरेक इहैव लब्धः ॥८॥

दानेन कश्चिदिह यद्यपि देयमेतद्
रत्नं नदस्ति सिकतान्तरिहैव गूढम्।
निर्दिश्य धाम विनताङ्गुलिना करेण,
नत्वा प्रणम्य पुनरस्य तमादिदेश ॥९॥

विप्रोऽनुसृत्य सिकतामपसार्य तूर्णं,
रत्नं प्रफुल्लवदनः स तदुद्दधार।
आश्चर्यमागममुष्य स्वाङ्गुरीयं,
स्पर्शात् मणेः सपदि काञ्चनतामवाप ॥१०॥

विप्रस्तु विस्मयभरादवशाङ्गयष्टि-
रासांवभूव पुलिनोपरि विह्वलात्मा ।
संमन्त्रितः किमवहत् स ललाटरेखां,
नद्याः कलध्वनिमिषेणपुरो वहन्त्या॥११॥
क्लान्तोऽरुणश्च दिवसाध्वपरिश्रमेण,
पारेनदं रविरियाय शनैरथास्तम् ।
उत्थाय सोऽपि पदयोः प्रणिपत्य साधोः,
अश्रुप्लुतेन वदनेन पुनस्तमूचे ॥१२॥
भूत्वाग्रणी र्धनवतां सुधनेन येन,
नैतादृशानपि मणीन् गणयेः कथञ्चित ।
तस्यैव कंचन लवं कुरु मे प्रसाद—
मित्यक्षिपत्,पयसि दूरतरे मणिं सः॥१३॥

प्रश्नाः

१—धनार्थी ब्राह्मणः किमर्थः स्पर्शमणिं प्राक्षिपत् ?

२—अपि भवन्तः स्पर्शमणिं लब्ध्वा दूरे प्रक्षेप्तुं समर्थाभविष्यन्ति उत नैव ?

३—वाच्यपरिवर्त्तनं विधेयम्—स्वाराधितः पशुपतिस्तत्प्रसादरेण । रत्नं प्रफुल्लवदनः स तदुद्धार । स दूरतरे पयसि मणिमक्षिपत् ।

शब्दार्थ

१—मङ्गलश्लोकाः

उदेति—उत्पन्न होता है। लीयते-समा जाता है। सहजानन्दो०-स्वाभाविक आनन्द से उज्ज्वल। शाश्वतम्-नित्य, सदा रहने वाला। अपुनर्भावाय-मोक्ष प्राप्ति के लिए। द्वैतध्वान्तम्-द्वैतवाद के अँधेरे को। अपास्य-दूर करके। प्रमाणपटवः-प्रमाण (सबूत) देने में चतुर। जैनशासनरताः-जैनी लोग। वेदितव्यम्-जानना चाहिए। निधानम्-कोष, खजाना। अव्ययः-अविकारी, नित्य। शाश्वतधर्म०-निरन्तर धर्मरक्षक। प्रतिजहि-नष्ट कीजिये। द्रविणम्-धन। करबदरसदृशम्-हाथ पर रखे बेर के समान, हस्तामलक। कुन्देन्दु०-कुंद, चन्द्र, बर्फ की माला के समान श्वेत। वीणावरदण्ड०-वीणा के दंड से सुशोभित हाथ वाली। दुरितारि-पापों को नष्ट करने वाला। गिरिराजगुहाविदारि-हिमालय की गुफाओं को विदीर्ण करने वाला। हरिपादरजोपहारि-भगवान् विष्णु की चरणरज को धोने वाला। गंगा भगवान् विष्णु के चरण के अंगूठे से उत्पन्न हुई हैं। यशः काये-यशरूपी शरीर में जरामरणजं भयम्-बुढ़ापे और मृत्यु का डर।

२—आचारशिक्षा

आचारेषु-आचरण में। अभिवादयेत्-प्रणाम करना चाहिये। ब्राह्मे मुहूर्ते-प्रातःकाल, तड़के चार बजे। अधीत्य-पढ़ कर। पश्चात्-बाद में, अन्त में। कुर्यात्-कुरेदना चाहिये। निघृष्यात्-रगड़ना चाहिये। नापकुर्वीत-अपराध न करना चाहिये। परिवादम्-निन्दा। अनृतम्-असत्य। वर्जे-

कम प्रसन्नता। मूत्रपुरीषे-मल-मूत्र। निषण्णः-बैठा हुआ। निर्बन्ध-हठ, दुराग्रह। परदाराः-पराई महिलायें। संसदि-सभा में। न श्लाघेत्-प्रशंसा न करनी चाहिये। न मन्त्रयेत्-सलाह न करे।

३—वाल्मीकेः शोकः श्लोकत्वमापद्यत

माध्याह्निककृत्यम-दोपहर का सन्ध्या वन्दन। अवगाह-यिष्ये-स्नान करूँगा। अभ्यासे-समीप में। शोणितपरीतांगं-खून से भरे हुए लोहूलुहान को। विपन्नानुकम्पनम्-विपत्ति में फँसे हुये-विपद्ग्रस्त-पर दया। शोकानलसमीरितः-शोकरूपी अग्नि से दग्ध, अत्यन्त शोकातुर। व्याहृतम्-उच्चारण किया, कहा। प्रांजलिः-हाथ जोड़े हुए। पद्मयोनिः-ब्रह्माजी। अब्ज-योनिः-ब्रह्माजी।

४—परोपकारः

क्रतुशतैः-सैकड़ों यज्ञों द्वारा। उत्सृजेत्-त्याग देना चाहिये। फलोद्गमैः-फलों के उत्पन्न होने आने से। अनुद्धताः-विनीत। दिनकरप्रभवाम्-सूर्य से उत्पन्न होने वाली (शोभा) को। अनपेक्षितगुणदोषः-गुण तथा दोषों की पर्वाह न करने वाला। विभाति शोभित होता है।

६—श्रीशङ्कराचार्यचरितम्

वेदवेदांग०-वेद और शास्त्रों का ज्ञाता। विपश्चितः-विद्वान् की। उदवहत-विवाह किया। तटनीम्-नदी को। उद्विग्न-मनाः व्याकुल। विसंज्ञा-मूर्च्छित, बेहोश। अपूर्णसंन्यास०-जिसकी संन्यास ग्रहण की इच्छा पूर्ण न हो सकी। निरा-कुर्वन् खंडन करता हुआ। आराधनासंसक्तः-पूजन में लगा हुआ। दैवदर्विपाकात-दर्भाग्यवश। उपनयनसंस्कृतः-

शब्दार्थ

१—मङ्गलश्लोकाः

उदेति—उत्पन्न होता है। लीयते-समा जाता है। सहजानन्दो०-स्वाभाविक आनन्द से उज्जल। शाश्वतम्-नित्य, सदा रहने वाला। अपुनर्भावाय-मोक्ष प्राप्ति के लिए। द्वैतध्वान्तम्-द्वैतवाद के अंधेरे को। अपास्य-दूर करके। प्रमाणपटवः-प्रमाण (सबूत) देने में चतुर। जैनशासनरताः-जैनी लोग। वेदितव्यम्-जानना चाहिए। निधानम्-कोष, खजाना। अव्ययः-अविकारी, नित्य। शाश्वतधर्म०-निरन्तर धर्म-रक्षक। प्रतिजहि-नष्ट कीजिये। द्रविणम्-धन। करबदरसदृशम् हाथ पर रखे बेर के समान, हस्तामलक। कुन्देन्दु०-कुंद, चन्द्र, बर्फ की माला के समान श्वेत। वीणावरदण्ड०-वीणा के श्रेष्ठ दण्ड से सुशोभित हाथ वाली। दुरितारि-पापों को नष्ट करने वाला। गिरिराजगुहाविदारि-हिमालय की गुफाओं को विदीर्ण करने वाला। हरिपादरजोऽपहारि-भगवान् विष्णु की चरणरज को धोने वाला। गंगा भगवान् विष्णु के चरण के अंगूठे से उत्पन्न हुई है। यशः काये-यशरूपी शरीर में जरामरणजं भयम्-बुढ़ापे और मृत्यु का डर।

२—आचारशिक्षा

आचारेण-आचरण से। अभिवादयेत्-प्रणाम करना चाहिये। ब्राह्मे मुहूर्ते-प्रातःकाल, सुबह चार बजे। अर्धात्प- [illegible]। [illegible]-याद में [illegible] में। कुर्यात्स्नानम्-नहाना चाहिये। [illegible]-[illegible] चाहिये। नावमूत्रयेत्-पेशाब न करना चाहिये। परिवादम्-निन्दा। अनृतम्-असत्य। कर्म-

कम प्रसन्नता। मूत्रपुरीषे–मल-मूत्र। निषण्णः–बैठा हुआ। निर्बन्ध–हठ, दुराग्रह। परदाराः–पराई महिलायें। संसदि–सभा में। न श्लाघेत्–प्रशंसा न करनी चाहिये। न मन्त्रयेत्–सलाह न करे।

३—वाल्मीकेः शोकः श्लोकत्वमापद्यत

माध्याह्निककृत्यम्–दोपहर का सन्ध्या वन्दन। अवगाहयिष्ये–स्नान करूँगा। अभ्यासे–समीप में। शोणितपरीतांगं–खून से भरे हुए लोहूलुहान को। विपन्नानुकम्पनम्–विपत्ति में फँसे हुये–विपद्ग्रस्त–पर दया। शोकानलसमीरितः–शोकरूपी अग्नि से दग्ध, अत्यन्त शोकातुर। व्याहृतम्–उच्चारण किया, कहा। प्रांजलिः–हाथ जोड़े हुए। पद्मयोनिः–ब्रह्माजी। अब्जयोनिः–ब्रह्माजी।

४—परोपकारः

क्रतुशतैः–सैकड़ों यज्ञों द्वारा। उत्सृजेत्–त्याग देना चाहिये। फलोद्गमैः–फलों के उत्पन्न होने आने से। अनुद्धताः–विनीत। दिनकरप्रभवाम्–सूर्य से उत्पन्न होने वाली (शोभा) को। अनपेक्षितगुणदोषः–गुण तथा दोषों की पर्वाह न करने वाला। विभाति शोभित होता है।

६—श्रीशङ्कराचार्यचरितम्

वेदवेदांग०–वेद और शास्त्रों का ज्ञाता। विपश्चितः–विद्वान् की। उदवहत–विवाह किया। तटनीम्–नदी को। उद्विग्नमनाः व्याकुल। विसंज्ञा–मूर्च्छित, वेहोश। अपूर्णसंन्यास०–जिसकी संन्यास ग्रहण की इच्छा पूर्ण न हो सकी। निराकुर्वन्–खंडन करता हुआ। आराधनासंसक्तः–पूजन में लगा हुआ। दैवदुर्विपाकात्–दुर्भाग्यवश। उपनयनसंस्कृतः–जिसका यज्ञोपवीत–जनेऊ–हो चुका है। गमागमप्रयासम्–

आने जाने का श्रम। निम्नगा-नदी। विभावितम्-जान लिया। मध्यस्था-निर्णय करने वाली-न्यायाधीश। कैवल्यं संप्राप्तः-मोक्ष पा गया-ब्रह्म में लीन हो गया।

६—बाल्यसंस्कारःऽमार्ज्यः

निभृतम्-चुपचाप। श्रेयस्करम्-कल्याणकारी। तातपादाः-श्रीमान् पिताजी। वर्त्तनीयम्-व्यवहार करना चाहिये। अच्याव्य-हटा कर, गिरा कर शूलावतंसीकृताः-शूली पर चढ़ा दिये गये। मार डाले गये। हस्तौ मुकुलीकृत्य-हाथ जोड़ कर। मानधनस्य-जिसका मान ही धन है गर्वशील। शृंखलाबद्ध०-जंजीर से बंधे पैर वाला-पराधीन। रक्षालेपेन-राख लपेट कर-भस्म रमा कर। यापयिष्यामि-बिता दूँगा। निसर्गत एव—स्वभाव से ही। बिभर्त्ति-धारण करता है। बलीयसान्-बलवानों को।

७—मून्यज्ञानम्

करुणाभिधाना करुणा नामक। विहगाः-पक्षी। अरम्-शीघ्र। वेपमानानि-कम्पित। अरसाः-शुष्क। उदीरयन्ती-कहती हुई। परिहासनवावतारः-विनोद-हँसी-का नया ढंग। कर्कशशासना-कठोर आज्ञा देने वाली। गतविवेक०-ज्ञान और बुद्धि से शून्य। आनन्दगीतिः-फल-गान- गुबद का फूलना-पचपचाना। उटजेषु-तिनकों द्वारा निर्मित झोंपड़ियों में। अरविन्दहस्ता-हाथ में कमल पुष्प धारण करने वाली। निरवग्रहाः-अनाथ। निगडबद्ध०-[illegible] हुए। भयभग्न०-भय से अवरुद्ध कण्ठ वाले-भय के कारण जिनके मुख से शब्द नहीं निकलता है। उटजानि-झोंपड़ियों को। धार्मिक०-सदाचारिता-विचारों का सा वेष धारण करने वाली। मधुरा-मन हरण। संवत्सरः-एक वर्ष।